KSUL
001791
KSUL

I-1540.
KSUL
001791
KSUL
001791

16

KÂVYAMÂLÂ. 50.

THE ALANKÂRAŚEKHARA

OF

KES'AVAMIS'RA.

EDITED

BY

PAṆḌIT S'IVADATTA,

Head Paṇḍit and Superintendent, Sanskṛit Department,
Oriental College, Lahore.

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

REVISED BY

WÂSUDEV LAXMAṆ SHÂSTRÎ PAṆS'ÎKAR.

Second Edition.

PUBLISHED

BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE "NIRṆAYA-SÂGAR" PRESS,

BOMBAY.

1926.

Price 12 Annas.

NIRNAYA SAGAR PRESS
Revised Price
Rs. 1-0

[All rights reserved by the publisher.]

PUBLISHER:–Pandurang Jawaji, } 'Nirnaya-sagar' Press,
PRINTER:–Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

काव्यमाला. ५०.

श्रीमाणिक्यचन्द्रकारितः

श्रीकेशवमिश्रकृतः

अलंकारशेखरः ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च संशोधितम्, तच्च पणशीकरोपाह्व-
लक्ष्मणशर्मात्मजवासुदेवशर्मणा
संस्कृतम् ।

द्वितीयावृत्तिः

तच्च

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वीये निर्णयसागराख्ययन्त्रालये मुद्रयित्वा प्राकाश्यं नीतम् ।

१९२६.

मूल्यं १२ आणकाः ।

NIRNAYA SAGAR PRESS
Revised
Price
Rs. 1-0

काव्यमाला।

श्रीमाणिक्यचन्द्रकारितः श्रीमत्केशवमिश्रकृतः

अलंकारशेखरः।

प्रथमो मरीचिः।

प्राणान्कृशोदरीणां राधानयनान्तसर्वस्वम्।
तेजस्तमालनीलं शरणागतवज्रपञ्जरं वन्दे॥
स्वप्रकाशचिदानन्दमयाय परमात्मने।
अविद्यानिबिडध्वान्तभास्कराय नमो[1]ऽन्वहम्॥
ग्रन्थाः काव्यकृतां हिताय विहिता ये सप्त पूर्वं मया
ते तर्कार्णवसंप्लवव्यसनिभिः शक्याः परं वेदितुम्।
इत्यालोच्य हृदा मदालसवधूपादारविन्दक्वण-
न्मञ्जीरध्वनिमञ्जुलोऽयमधुना प्रस्तूयते प्रक्रमः॥
आसीत्प्रत्यर्थिपृथ्वीरमणकमलिनीवृन्दहेमन्तमासः
कीर्तिभ्राजत्सुशर्मान्वयकुमुदवनीयामिनीजीवनाथः।
राजद्राजन्यराजीमुकुटमणिगणप्रोल्लसत्पादपीठः
प्रोद्यत्साम्राज्यलक्ष्मीशिथिलितनहुषो रामचन्द्रोऽवनीन्द्रः॥
मित्राणि प्रतिपालयंस्त्रिजगतीं कीर्तीन्दुना ह्लादय-
ञ्शत्रूणां हृदयं प्रतापदहनै रात्रिंदिवं ज्वालयन्।
सर्वस्वेन कृतार्थयन्द्विजगणान्देवान्मखैस्तोषय-
न्नेष प्रौढमनाश्चिराय बुभुजे सप्तार्णवां मेदिनीम्॥
सूत्रामोद्दामढि[2]ल्लीपरिवृढविलसत्काबिलक्षोणिभर्त्रोः
प्रक्रान्ते प्रौढयुद्धे समदलयदसौ कोटिशो वैरिवीरान्।

---

१. 'नमाम्य' क. २. 'दिल्ली' ख.

पश्चान्मांसास्थिमेदःकलुषितवसुधां प्रोज्झ्य तांश्चाकलय्य
द्यां यातान्वैरिवर्गान्दिवमपि सहसा जेतुकामो जगाम ॥
क्षीराम्भोधेः शशीव श्रुतिरिव वदनाद्वेधसो **रामचन्द्रा-**
दस्मादुद्यत्प्रतापः समजनि सुमना **धर्मचन्द्रो** नरेन्द्रः ।
यस्याद्यापि प्रसन्नस्मितसुभगमुखाः स्विद्यदञ्चत्कपोला
रोमाञ्चस्तम्भभव्यास्त्रिदशयुवतयो हन्त गायन्ति कीर्तीः ॥
निष्क्रान्तं सदनादुदैक्षि भगवानम्भोजिनीवल्लभ-
स्ते वाताः परिशीलिताः कमलिनीसौरभ्यमेदस्विनः ।
विश्रान्तं गिरिकाननेषु निबिडच्छायेषु भाग्योदया-
दित्थं स्मेरमुखाः स्तुवन्ति विपदं यद्वैरिवामभ्रुवः ॥
प्रत्यर्थिभूपतिपरिग्रहराज्यलक्ष्मी-
धम्मिल्लमाल्यसुरभीकृतपाणिपद्मः ।
तस्मादजायत समस्तगुणाभिरामो
माणिक्यचन्द्र इति राजकचक्रशक्रः ॥
काव्यालंकारपारंगममतिरखिलक्ष्माभृतां चक्रवर्ती
सर्वेषामस्तु काव्ये मतिरतिनिपुणेत्याशये संनिवेश्य ।
वेदान्तन्यायविद्यापरिचयचतुरं **केशवं** संनियुज्य
श्रीमन्**माणिक्यचन्द्रः** क्षितिपतितिलको ग्रन्थमेनं विधत्ते ॥
बहुदोषोऽपि विदोषः क्रियते सुजनेन बाण इव हरिणा ।
गुणवदपि निर्गुणीयति दुर्जनतो मूषिकात इव पुस्तम् ॥
परोद्वेगे परानन्दे खलसज्जनयोर्द्वयोः ।
स्वभाव एव शरणं विषपीयूषयोरिव ॥

अलंकारविद्यासूत्रकारो भगवाञ्शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्तयिष्यन्प्रथमं काव्यस्वरूपमाह—

काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् ।

आदिपदेनालंकारपरिग्रहः । तथा च तदुभयान्यतरवत्त्वं[1] लक्षणम् ।

१. 'त्त्वं वा' ख.

अन्यतरत्त्वं च तदन्यान्यत्वम् । सुखविशेषसा[1]धनत्वं वा लक्षणम् । समुदायार्थशू[2]न्येऽपि तदुभयमस्त्येवेति वृद्धाः । अदृष्टद्वारा तद्धेतुशब्देऽतिव्याप्तिराह—श्रुतमिति । सदिति शेषः । सुखे वैजात्यं सर्वानुभवसिद्धमेव ॥

केचित्तु—

'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।'

इत्याहुः ॥ 'रसप्र[3]तिपत्तिद्वारा सुखविशेषसाधनं वाक्यं **काव्यम्**' इत्यपरे ॥
केचित्तु—'पदावली **काव्यम्**' । न तु निर्दोषगुणवदादि, काव्यदोषाणामपरिगणनापत्तेः । न च—दोषाभावघटितकाव्यत्वज्ञानार्थमेव प्रतियोगिपरिगणनम्—इति वाच्यम्, 'न चैतत्काव्यं दुष्टम्' इत्यनुद्भावनापत्तेः 'इदं काव्यमेव न' इत्यभिधानस्यैवोचितत्वात्–इत्याहुः । तन्न । तवायं हेतुराभास इतिवदुपपत्तेः । व्याप्तिविशिष्टपक्षधर्मस्यैव हेतुत्वात् । न च हेतुत्वेनाभिमत इति वाच्यम् ॥ तुल्यत्वादिति ॥ व[4]स्तुतस्तत्काव्यं पृथगेव यत्र दोष[5]गुणादिचिन्ता । नहि । दुष्टं शरीरं शरीरमेव न भवति, इत्यन्ये ॥
कीर्त्यादिरूपफलसाधनता तु विशिष्टस्य । यदाह—

'साधुशब्दार्थसंदर्भं गुणालंकारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥'

आहुश्च—

'निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन्प्रीतिं कीर्तिं च विन्दति ॥' इति ॥

प्रवृत्त्यौपयिकं फलमाह—

हिताय सुकविः कुर्यात्

सुकवेरेव हितम्, अन्यस्य तु प्रति[6]कूलं तत् ॥

उक्तं[7] च—

'गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ताः पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥

---

१. 'साधनं' ख. २. 'शून्यत्वे' ख. ३. 'प्रतिपत्तिगुणद्वारा' ख. ४. 'वस्तुतस्तु का' क-ख. ५. 'गुणदोषादि' क. ६. 'कूलमिदमिति भावः' क. 'प्रतिकूलमिति तत्र' ख. ७. 'तदुक्तम्' क.

श्लाघ्यः पामरपरिषदि कवयति दोलीककर्तापि ।
यस्मै स्पृहयति विद्वाँस्तत्काव्यं काव्यमित्याहुः ॥
अर्थैः कृतार्थयन्त्येके घटनापटवः परे ।
उभयत्र प्रवीणा ये त एव कवयो मताः ॥'

हितमाह श्रीपादः—

'लाभः पूजाख्यातिर्धर्मः कामश्च मोक्षश्च ।
इष्टानिष्टप्राप्तित्यागौ ज्ञानं फलानि काव्यस्य ॥'

इष्टेति गोवृषन्यायात् ॥

आहुश्च—

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥'

वृद्धास्तु—

'श्रोतॄणां द्राग्महानन्दः स खस्मिन्नाभिमानिकः ।
तत्कालफलमेतावत्क्रमात्कीर्तिधनादिकम् ॥'

नन्वेवं सर्वः सुकविरेव स्यात् । अत आह—

तद्धेतुः प्रतिभादिकम् ॥ १ ॥

सदाह—

'प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम् ।
भृशोत्पत्तिकृदभ्यासः काव्यस्यैषा व्यवस्थितिः ॥'

व्युत्पत्तिर्नानातन्त्रज्ञानम् ॥

आहुश्च—

'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥'

शक्तिः पुण्यविशेषः । स एव प्रतिभेत्युच्यते ।

'व्युत्पत्तिः शक्तिरभ्यासस्त्रितयं काव्यसाधनम् ।'

इत्यपि ॥

---

१. 'यस्य' क. २. 'कृतोऽभ्यासः' क.

श्रीपादस्तु—

'परिशीलितकाव्यवर्त्मनां कविसंसर्गविशुद्धचेतसाम् ।
परिभावयतामनुक्षणं कविता पाणितले निषीदति ॥'

[1]वृद्धास्तु—

'नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसंपदः ॥
मनःप्रसत्तिः प्रतिभा प्रातःकालेऽभियोगिता ।
अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः ॥
[2]द्वित्रिकोषपरिज्ञानं [3]द्वित्रिव्याकरणज्ञता ।
छन्दोविद्याप्रवीणत्वं काव्येऽवश्यमपे[4]क्ष्यते ॥'

आदिपदात्प्रकारज्ञानम् । तथाहि—सा खल्वेषा भारती सुरसरिदिव सहस्रमुख्यपि संक्षेपेण चतुर्धा प्रवर्तते । तदाहुः—

'संस्कृतं प्राकृतं चैव पैशाची मागधी तथा ।
विद्याश्चतस्र एवैताः संक्षेपात्काव्यवर्त्मनः ॥
देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः ।
पैशाचीं [5]च पिशाचाद्या मागधीं हीनजातयः ॥
चतसृष्वपि मूर्धन्यं संस्कृतं मुनयो विदुः ।
गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम् ।
गद्यमुत्कलिकाप्रायं पद्यगन्धीति च द्विधा ॥
तत्रापि पद्यं तदपि वृत्तकं वर्णमात्रयोः ।
समवैषम्यभेदेन तदानन्त्याय कल्पते ॥'

दण्डिनस्तु—

'तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।
अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ॥

---

१. ख-पुस्तके नास्ति. २.-३. 'द्वित्रि' ख. ४. 'क्षते' ख. ५. 'तु' ख.

प्राकृतं तज्जतत्तुल्यदेश्यादिकमनेकधा ।
अपभ्रंशश्च यच्छुद्धं तत्तद्देशेषु भाषितम् ॥
संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम् ।
आसारादि त्वपभ्रंशो नाटकादि तु मिश्रकम् ॥
यथामति यथाशक्ति यथौचित्यं यथारति ।
कवेः पात्रस्य चैतासां प्रयोग उपपद्यते ॥'

इत्यलंकारशेखर उपक्रमरत्ने काव्यस्वरूपफलकारणमरीचिः ॥ १ ॥

द्वितीयो मरीचिः ।

[1]शरीरकल्पस्य काव्यस्य रूपान्तरमाह—

रीतिरुक्तिस्तथा मुद्रा वृत्तिः काव्यस्य जीवितम् ।
त्रिविधस्यापि दोषास्तु त्याज्याः श्लाघ्या द्वये गुणाः ॥ १ ॥
अलंकारस्तु शोभायै रस आत्मा परे मनः ।

द्वय इति शब्दार्थभेदात्रितयान्वयि । परे रसदोषभावानुकूलवर्णादयः ॥

तत्र रीतिमाह—

तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः ॥ २ ॥
पद्येषु रीतयो गौडी वैदर्भी मागधी तथा ।

तदेतत्पल्लवयन्ति श्रीपादाः—

'गौडी समासभूयस्त्वाद्वैदर्भी च तदल्पतः ।
अनयोः संकरो यस्तु मागधी सातिविस्तरा ॥
गौडीयैः प्रथमामध्यावैदर्भैर्मैथिलैस्तथा ।
अन्यैस्तु चरमा रीतिः स्वभावादेव सेव्यते ॥'

तत्र गौडी यथा—

'उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥'

---

१. 'शरीरि' ख.

वैदर्भी यथा—

'[1]मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥'

मागधी यथा—

'पाणौ पद्मधिया मधूककुसुमभ्रान्त्या पुनर्गण्डयो-
र्नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे ।
लीयन्ते कबरीषु बान्धवजनव्यामोहजातस्पृहा
दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि [2]रक्षिष्यसि ॥'

इयं बहुधा विस्तृतमन्यत्र ॥

भोजराजस्तु—

'शस्ता विदग्धगोष्ठीषु वैदर्भी रीतिरुत्तमा ।
मागधी मध्यमा गौडी गौडस्त्री कलहायते ॥'

यदाह—

'ब्रह्मन्विज्ञापयामि त्वां स्वाधिकारजिहासया ।
गौडस्त्यजतु वा गाथामन्या वास्तु सरस्वती ॥'

उक्तिं विभजते—

लोकच्छेकार्भकोन्मत्तभेदादुक्तिश्चतुर्विधा ॥ ३ ॥

तत्र लोकोक्तिर्यथा—

'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥'

च्छेको विदग्धस्तस्योक्तिर्यथा—

'योऽतिदीर्घासिताक्षस्य विलास[3]वलितभ्रुवः ।
कान्तामुखस्यावशगस्तस्मै नृपशवे नमः ॥'

अत्र 'नृपशवे [4]नमः' इति ॥

---

१. 'मनीषितामर्चे गृहेषु देवतां' क. २. 'संरक्षसि' क. ३. 'चलित' ख. ४. 'नास्ति' ख.

अर्भकोक्तिर्यथा—

'स किं स्वर्गतरुः कोऽपि यस्य पुष्पं निशाकरः ।
मातस्ते कीदृशा वृक्षा येषां मुक्ताफलं फलम् ॥'

अत्र पुष्पं निशाकरः, फलं मुक्ताफलमिति ॥

उन्मत्तोक्तिर्यथा—

'क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति ॥'

अत्र विरहोन्मत्तस्यैवमभिधानम् ॥

विन्यासविशेषवशाद्यत्राभिप्रायविशेषलाभेन मुदो हर्षस्योत्पत्तिः सा मुद्रा ॥

तामिदानीं विभजते—

'मुद्रा पदस्य वाक्यस्य विभक्तेर्वचनस्य च ॥'

तत्र[1] पदमुद्रा यथा—

'निर्माल्यं नयनश्रियः कुवलयं, वक्त्रस्य दासः शशी
भ्रूयुग्मस्य सनाभि मन्मथधनुर्ज्योत्स्नासितस्याञ्चलम् ।
संगीतस्य च मत्तकोकिलरुतान्युच्छिष्टमेणीदृशः
सर्वाकारमहो विधेः परिणतं विज्ञानशिल्पं चिरात् ॥'

अत्र निर्माल्यादि पदानां गौणवृत्त्याभिप्रायविशेषान्मुत्प्रदायिता ॥

वाक्यमुद्रा यथा—

'रामे तटान्तवसतौ कुशतल्पशायि-
न्यद्यापि नाम भवतो भगवन्ननास्था ।
स्मृत्वा तदेहि सगरं च भगीरथं च
दृष्ट्वाथ वा मम धनुश्च शिलीमुखांश्च ॥'

अत्र सगरं च भगीरथं चेत्यादिवाक्यस्य प्रागुपकाराभिप्रायेण दृष्ट्वा यावदपकारसामर्थ्याभिप्रायेण निवेशनान्मुत्प्रदायिता ॥

---

१. 'तासु' क.

विभक्तिमुद्रा यथा—

'श्रियं प्रदुग्धे विपदो रुणद्धि यशांसि सूतेऽविनयं प्रमार्ष्टि।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः॥'

अत्र प्रदुग्ध इत्यादि तिङ्विभक्तीनां द्वयोर्द्विकर्मकयोर्निवेशनान्मङ्गल्यामङ्गल्यार्थकानामपि मङ्गल्य एवाभिप्रायवशाद्विभक्तिमुद्रा॥

वचनमुद्रा यथा—

'विश्वंभरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां गृहेषु सविता च गुरुर्वयं च॥'

अत्र वयमिति वचनेन सवितुरहं महानित्यभिप्रायाद्वचनमुद्रा॥

'प्रयोजनं यथैतासां रसमैत्री च विस्तरः।
तथालंकारसर्वस्वे सप्रपञ्चमदर्शयम्॥'

इत्यलंकारशेखर उपक्रमरत्ने रीत्यादिबहिरङ्गत्रयमरीचिः॥ २॥

तृतीयो मरीचिः।

अथ वृत्तिं विभजते—

पदानां वृत्तयस्तिस्रः

तिस्रो वृत्तयः पदानां भवन्ति, शक्तिर्लक्षणा व्यञ्जना चेति। तत्र—शक्तिरीश्वरेच्छा या संकेत इत्युच्यते। सा पदेषु प्रसिद्धैव॥ सा च—

'कोशव्याकरणाप्तोक्तिवाक्यशेषोपमादितः।
प्रसिद्धपदसंबन्धाद्व्यवहाराच्च बुध्यते॥'

लक्षणा शक्यसंबन्धः। सा च तात्पर्यानुपपत्त्या मुख्यार्थानुपपत्त्या वा प्रवर्तते॥ यथा 'निर्माल्यं नयनश्रियः' इत्यादौ निर्माल्यदासादिपदे॥

तृतीया वृत्तिर्व्यञ्जना यथा—

'निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।

मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥'

अत्राधमपदेन रन्तुं गतासीति व्यज्यते ॥

ननु 'रविरस्तं गतः' इत्यादौ तान्येव पदानि कथं श्रोतॄणां विचित्रबुद्धीरुत्पादयन्तीत्यत आह—

विचित्रसहकारिणाम्।

तदेव हि पदं स्वरससमभिव्याहारप्रकरणतात्पर्यज्ञानादिरूपसहकारिभेदात्तत्तद्धियमुत्पादयति दण्ड इव गवाभ्याजनघटौ ॥

ननु शं[1]क्त्यादिकमानुपूर्वीविशेषविशिष्टवर्णसमुदाये, तत्कथमेकदेशस्य बोधकतात आह—

स्वभाववैचित्र्यजुषाम्

विचित्रस्वभावानि खलु पदानि भवन्ति। क्वचिदेकदेशस्याद्यस्य बोधकता। यथा भीमसेनबलदेवादिपदादौ ॥ क्वचिच्चरमस्य। यथा—मतंगजवसुंधरा धराधरपदादौ। सा च तत्तत्पदस्मरणेन प्रकारान्तरेण चेत्यन्यदेतत् ॥ किं च कर्णावतंसपदवत् शक्यतावच्छेदकस्य पृ[2]थगुपादानेनापि न पौनरुक्त्यं भवति। यथा—करिबृंहितमयूरकेकादौ। क्वचित्—शक्यस्यापि। यथा—'उदयाचलकारागृहादौ। उदयपदस्य पूर्वाचले, कारापदस्य बन्दिगृहे शक्यत्वात्। किं च परस्परविरुद्धतया तिरस्कृततृतीयकोटिकमिवान्यतरप्रतिक्षेपे परस्यैव लाभं जनयति। यथा—'शीतेतरानुष्णकरा हिमांशोः' इत्यादौ 'अपांसुलानां धुरि कीर्तनीया' 'स नन्दिनीस्तन्यमनिन्दितात्मा' इत्यादौ प्रकर्षलाभवदित्यवधेयम्। किंचित्पदमनपेक्ष्यरूढिकम्, यथा—'सिंहादवाप द्विपदं नृसिंहः' इत्यादौ। किंचिच्चानपेक्ष्ययौगिकम्, यथा—क्षीराम्भोधेरित्यादौ, अन्यथानन्वयापत्तिः। किं च वामनयना वामोरुरिति भवति न तु वामवदना वामपाणिरिति। सर्वं चेदं क्वचिदेव पदे। अत उक्तं स्वभावेति ॥

---

१. 'शक्त्यादि' ख. २. 'पुनरुक्तत्वेऽपि' क.

तत्किं यद् व्यञ्जनापि पदमात्रवृत्तिरेव नेत्यत आह—

व्यञ्जनार्थत्रयेऽपि च ॥ १ ॥

शक्यलक्ष्यव्यङ्ग्यात्मक इत्यर्थः ॥ शक्यार्थस्य व्यञ्जकता यथा—

'अवलोकय निष्पन्दो बिसिनीपत्रे बको भाति ।
निर्मलमरकतभाजनपरिस्थितो विमलशङ्ख[1] इव ॥'

अत्र निष्पन्दशब्दस्यार्थेन क्रियाविरहेण बकगतमाश्वस्तत्वं व्यज्यते ॥

लक्ष्यार्थस्य यथा—

'मुखं विकसितस्मितं वेसित[2]वक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनं[3]मंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥'

अत्र विकासः पुष्पधर्मो मुखेऽनुपपन्न इति लक्षितेन प्रसृतत्वेन लोकोत्तर-रमणीयतात्मकातिशयो व्यज्यते ॥ एवमग्रेऽपि । व्यङ्ग्यार्थस्य यथा 'अव-लोकय–' इत्यादावेव व्यङ्ग्येनाश्वस्तत्वेन देशस्य संकेतयोग्यत्वं व्यज्यते ॥

त्रिविधस्यापीति ॥ उत्तममध्यमाधमात्मकस्य । तत्र—

'वाच्यनिरूपितव्यङ्ग्यप्रकर्षाधारत्व**मुत्तमत्वम्** ।' यथा—'निःशेषच्युत-चन्दनम्' इत्यादौ वा[4]च्यार्थापेक्षया व्यङ्ग्यार्थ एव झटिति चमत्कार-विशेषमारोहति ॥

वाच्यनिरूपितव्यङ्ग्यप्रकर्षानाधारत्वं **मध्यमत्वम्** ।' यथा—

'ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥'

अत्र वञ्जुलकुञ्जे दत्तसंकेता तरुणी न गतेति व्यज्यते । तच्च गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्[5]कारकारित्वात् ॥

चमत्कृतिहेतुव्यङ्ग्यरहितत्व**मधमत्वम्** । यथा—

'वन्दामहे महेशानचण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥'

---

१. 'शङ्खशुक्तिरिव' ख. २. 'वशित' ख. ३. 'मंश' क. ४. 'वाच्या' ख. ५. 'त्कारि' ख.

अत्र व्यङ्ग्यः कोऽप्यर्थस्तादृशो नास्ति। अत्र सर्वत्र[1] व्यञ्जनासु वक्तुरेव तात्पर्यं नियामकम्। तज्ज्ञानमेव बोधोपयोगि। तदभावादधममित्युच्यते। प्रपञ्चितं चेदं मयैव वाक्यरत्ने॥ ननु व्यञ्जना वृत्त्यन्तरमित्यत्र किं मानमिति। उच्यते—

'भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत्॥'

अत्र प्रकरणेन भद्रात्मन इत्यादि पदानां राज्ञि तदन्वययोग्ये चार्थेऽभिधानियन्त्रणेऽपि गजस्य तदन्वययोग्यस्य चार्थस्य व्यञ्जनयैव प्रतीतिः॥ वस्तुतस्तु—

'अद्यारभ्य चिरं साधो निःशङ्कमिह संचर।
रेवाकुञ्जे मृगेन्द्रेण स दुष्टश्चाद्य घातितः॥'

अत्र भिक्षुकं प्रत्येवं वदन्त्याः प्रतिवेशिनं प्रति निःशङ्करत्यभिधानं स्फुटमिति॥ किं च रेवाकुञ्जस्य रतस्थानत्वं लभ्यते, सिंहबुद्ध्या परेण न गन्तव्यम्, सिंहस्तु वस्तुगत्या नास्त्येव तदेतद्व्यञ्जनां विना प्रकारान्तरेण लब्धव्यमित्याशङ्कैव नास्तीति[2]॥

इत्यलंकारशेखर उपक्रमरत्ने वृत्तिमरीचिः॥ ३॥

इति श्रीमहाराजाधिराजश्रीमाणिक्यचन्द्रकारिते श्रीकेशवमिश्रविरचितेऽलंकारशेखर उपक्रमरत्नम्॥ १॥

चतुर्थो मरीचिः।

'दोषास्त्याज्याः' इत्युक्तम्। युक्तं चैतत्॥ यदाह—

'दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः।
अन्यो गुणोऽस्तु मा वास्तु महान्निर्दोषता गुणः॥'

---

१. 'सर्वत्र वक्तु' ख. २. 'श्रीपादः' क.

दण्डी च—

'तदल्पमपि नोपेक्ष्यं काव्ये[1] दुष्टं कथंचन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन[2] दुर्भगम् ॥'

दोषत्वं च रसोत्पत्तिप्रतिबन्धकत्वम् । रसकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् इति यावत् ॥

अत्र प्रथमं पददोषानाह—

कष्टाप्रयुक्तसंदिग्धव्यर्थाश्लीलाप्रतीतकाः ।
असाध्ववाचकौ दोषाः पदेऽष्टावेव भाषिताः ॥ १ ॥

कष्टं श्रुतिकटु यथा—

'बर्हिनिर्ह्रादनार्हेऽस्मिन्काले जीमूतमालिनि ।
आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभतां चिरात् ॥'

अत्र बर्हिनिर्ह्रादनकार्तार्थ्यादिशब्दाः ॥

अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतम् । यथा—

'यतोऽयं दारुणाचारो न हन्ति सुरनिम्नगाम् ।
अतो मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथ वा ॥'

अत्र हन्तीति गमने, दैवतशब्दः पुंसि कविर्न प्रयुक्तः ॥

संदिग्धं संदेहजनकम् । यथा—

'अपिधानेन हे वत्स किमर्थमिह वर्तसे ।
आरादेवास्ति स प्रायो यतस्ते भयमुत्थितम् ॥'

अत्रापिधानाराच्छब्दौ ॥

व्यर्थं प्रकृतार्थानुपयुक्तम् । यथा—

'बिभर्ति यश्च देहार्धे प्रियामिन्दुं हि मूर्धनि ।
स वै देवः खलु त्वां तु पुनातु मदनान्तकः ॥'

अत्र च-हि-वै-खलु-तु-शब्दाः ॥

अश्लीलमौज्वल्याभाववत् । तदपि त्रिविधम्, अमङ्गलव्रीडाजुगुप्साभेदात् ॥ क्रमेणोदाहरणम्—

---

१. 'काव्यं' क. २. 'श्वित्रेणै' ख.

'विनाशान्मारुतेस्तस्य सुमहत्साधनोऽपि सन्।
नासाग्रेण स सुग्रीवो वायुं त्यजति केवलम्॥'

अत्र विनाशसाधनवायुशब्दाः॥

अप्रतीतं स्वशास्त्रमात्रविरुद्धम्। यथा—

'त्रुटौ विश्रान्तिरित्येके पीलावस्तीति चापरे।
त्वन्मध्यमाणिमा तन्वि न केनापि विभाव्यते॥'

अत्र त्रुटिपीलुशब्दौ॥

असाधु अनुशासनविरुद्धम्। यथा—

'शातोदरि कथंकारं मानमेतच्चिकीर्षति।
मानिनीमानदलनो विजयत्येष चन्द्रमाः॥'

अत्र मानमेतद्विजयतीति।

अवाचकं प्रकृतार्थाशक्तम्। यथा—

'भूयोमत्तद्विरदगमनां हारकेयूरयुक्तां
पीनोत्तुङ्गस्तनभरनमन्मध्यभागाभिरामाम्।
स्मेरोदञ्चन्नवकिसलयस्पर्धिताम्राधरौष्ठीं
लक्ष्मीमक्षिस्फुरितवदनामन्वहं संस्मरामि॥'

अत्र लक्ष्मीपदमङ्गनायाः।

ग्राम्यं त्ववाचकाश्लीलान्यतरान्तर्भावान्न पृथगिति॥

इत्यलंकारशेखरे दोषरत्ने परदोषमरीचिः॥ ४॥

पञ्चमो मरीचिः।

अथेदानीमसाधारणान्वाक्यदोषानाह—

न्यूनं विसंधि व्याकीर्णं समाप्तपुनरात्तकम्।
भग्नः क्रमयतिच्छन्दोवाक्यगर्भमरीतिमत्॥ १॥
अभिमृष्टविधेयांशं समुदायार्थवर्जितम्।
विरुद्धमतिकृद्वाक्ये दोषा द्वादश कीर्तिताः॥ २॥

---

१. 'मरुत्' ख. २. 'पीलुर' क.

तत्र **न्यूनम**न्वयबोधप्रयोजकपदशून्यम् । यथा—

'तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने भजति मयि नाद्यापि कुरुषु ॥'

अत्र स्थितमित्यन्तरमस्माभिरिति, खिन्न इत्यस्मात्पूर्वमित्थमिति च दातुमर्हति ॥

विसंधिः संधिविरहो विरुद्धसंधिश्च । आद्योऽपि द्विविधः । ऐच्छिकः प्रगृह्यादिनिबन्धनश्च । ऐच्छिकः सकृदपि दोषः । उभयोरुदाहरणम्—

'मेघानिलेन अमुना एतस्मिन्नद्रिकानने ।
पादपा उत्तमा उच्चा इदानीमेव पातिताः ॥'

चरमश्चतुर्विधः । अश्लीलः कष्ट उत्वप्राप्तविसर्गो[१] लुप्तविसर्गश्च । क्रमेणोदाहरणानि—

'ववुरिन्दीवरश्रेणिबान्धवा यत्र वायवः ।
मञ्जर्युद्गमगर्भासौ तर्वाल्युर्वी विधूयते ॥'
'धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः ।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥'

व्याकीर्णं व्यवहितान्वयम् । यथा—

'मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ॥'

अत्र 'तद्गम्यताम्, तद्विरचय' इत्यन्वये तदिति व्यवहितम् ॥

समाप्तपुनरात्तकं समाप्तौ प्रधानवाक्यार्थबोधे जाते पुनरुपात्तम् । यथा 'निर्माल्यं नयनश्रियः' इत्यादौ चिरादिति । यथा च—

---

१. 'उपहतविसर्गो' क.

'क्रेङ्कारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो-
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरध्वनिः ।
तन्व्या कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्काणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः ॥'

अत्र वेणुस्वन इति ॥

भग्नक्रमं यत्रार्थः [1]शब्दो वा क्रमेनास्ति । उभयं यथा—

'तुरङ्गमथ मातङ्गं प्रयच्छास्मै मदालसम् ।
कान्तिप्रतापौ भवतः सूर्याचन्द्रमसोः समौ ॥'

भग्नयतिर्यथा—'रामे तटान्तवसतौ कुशतल्पशायिन्यद्यापि' इत्यादौ । अत्रावश्यकी [2]पदशेषयतिर्नास्ति ॥

भग्नच्छन्दो यथा—

'ततः परमोमित्युक्त्वा प्रतस्थे मुनिमण्डलम् ।
भगवानपि संप्राप्तः प्रथमोद्दिष्टमाश्रमम् ॥'

अत्र पञ्चमं लघु कर्तुमर्हति ॥

यत्रापर्यवसितवाक्यमध्ये तदनपेक्षवाक्यान्तरमनुप्रविशति **तद्वाक्यगर्भम्** । यथा—

'योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया ।
रक्षैनं यदि शक्तिर्मृत्युवशं नीयते विवशः ॥'

अत्र तृतीयपादगर्भता ॥

अरीतिमत् यां रीतिमुपक्रम्य प्रवृत्तं तद्भङ्गवत् । यथा—

'गाहन्तां महिषा निपानसलिलं [3]शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रब्धैः क्रियतां वराहत[4]तिभिर्मुस्ताक्षतिः पल्वले
विश्राममं लभतामिदं च शिथिलज्या[5]बन्धमस्मद्धनुः ॥'

---

१. 'शब्दो वाक्रमेण' ख. २. 'पद' क. ३. 'शृङ्गै' ख. ४. 'पतिभिः' ख. ५. 'बद्ध' ख.

अत्र तृतीयपादेऽनभिहितकर्त्रादरातद्भङ्गः।

अभिमृष्टविधेयांशं प्राधान्यानिर्दिष्टविधेयकम्। यथा—

'वपुर्विरूपाक्षम[1]लक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥'

अत्र जन्मोद्दिश्याल[2]क्ष्यत्वं विधेयम्। तच्च समासप्रविष्टतया न प्राधान्येन निर्दिष्टम्॥

समुदायार्थवर्जितं यथा—

'जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लशुनस्य कोऽर्थः॥'

अथ **विरुद्धमतिकृत्**—

'कुबेरस्येव भगवान्भवानीरमणो हरः।
अकार्यमित्रमेकोऽसौ वासुदेवः किरीटिनः॥'

अत्र भवानीरमणाकार्यमित्रशब्दौ विरुद्धां मतिं कुरुतः॥

'[3]असमर्थसमासो दोषान्[4]तरम्' इति गोवर्धनः। [5]यथा—

'प्राक्प्रत्यक्पृथिवीभृतोः परिषदि प्रख्यातसंख्यावता-
महायाद्भुततर्ककर्कशतया विच्छिद्य विद्यापदम्।
ये केऽप्युत्कलभूपते तव सभासंभाविताः पण्डिताः
पत्रं श्रीजयदेवपण्डितकविस्तन्मूर्ध्नि विन्यस्यति॥'

इत्यलंकारशेखरे [6]वाक्यदोषमरीचिः॥ ५॥

षष्ठो मरीचिः।

अथार्थदोषानाह—

अष्टार्थदोषा विरसग्राम्यव्याहतखिन्नताः।
हीनाधिकासदृक्साम्यं देशादीनां विरोधि च॥ १॥

---

१. 'मलक्ष' क. २. 'लक्षकं' ख. ३. 'अत्रासम' ख. ४. 'न्तरं गो' ख. ५. उदाहरणं क-पुस्तके नास्ति. ६. 'वाग्दोष' ख.

अत्र **विरसं** प्रस्तुतरसविरुद्धम् । यथा—

‘किं रोदिषि हा रावैः सुतमरणशुचं जहीहि किं म्रियसे ।
सफलय यौवनमधुना सममनुरक्तेन सुतनु मया ॥’

अत्र करुणशृङ्गारयोर्महान्विरोधः ॥

ग्राम्यमविदग्धोक्तिनिष्पन्नम् । यथा—

‘स्वपिम्यद्यानवद्याङ्गि [1]संप्रत्यासत्तवान्तिके ।
मनागूरुद्वयं बाले कुञ्चितं समुदञ्चय ॥’

व्याहतम् उपात्तविरुद्धम् । यथा—

‘विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥’

अत्र शैलदुहितृत्वभावप्रकाशनत्वे विरुद्धे । एकेन प्रस्तरप्रकृतित्वस्यापरेण विदग्धत्वस्य लाभात् ॥

खिन्नमपुष्टम् । यथा—

‘त्वत्प्रयाणसमुद्भूतधूली लुम्पति भास्करम् ।
कृपाणं पाणिना धत्से शूरो न त्वत्समो भुवि ॥’

अत्र धूल्युत्थापनकृपाणधारणयोरशूरसाधारण्याच्छौर्यस्यापुष्टिः ॥

हीनोप[2]मं यथा—

‘क्वचिदग्रे प्रसरता क्वचिदापद्यनिघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥’

अधिकोप[3]मं यथा—

‘वसिष्ठवदयं दासो हनूमानिव मूषिका ।
सरस्वानिव कूपोऽयं शुनीयं श्रीरिव स्वयम् ॥’

अत्र यद्यप्युपमेयानां प्रकर्ष एव, तथाप्यात्यन्तिकरसहानेः सोऽपि न [4]प्रतीयते ॥

---

१. ‘सप्रत्याशस्तवाङ्गके’ क. २–३. ‘पमा’ क. ४. ‘इति’ क.

असदृशोपमं यथा—

'निर्ययौ रुद्रनयनात्सस्फुलिङ्गो महानलः ।
वर्षन्ती शीकरासारं गङ्गा हिमगिरेरिव ॥'

अत्र स्फुटमसादृश्यम् ॥

देशादिविरोधि यत्र[1] तत्तद्देशकालवयोवस्थादिविरोधः प्रतीयते । यथा—

'प्रवेशे चैत्रस्य स्फुटकुटजराजिस्मितदिशि
प्रचण्डे मार्तण्डे हिमकण[2]समानोष्ममहसि ।
जलक्रीडायातं मरुसरसि बालद्विपकुलं
मदेनान्धं विध्यन्त्यसमशरपातैः प्रशमिनः ॥'

अत्र प्रवेशे चैत्रस्य, स्फुटकुटजेति कालस्य, मरुसरसीति देशस्य, (बालद्विपकुलं) मदेनान्धमिति वयसः, प्रशमिन इत्यवस्थाया विरोधः । इदं च तत्तच्छास्त्रतत्तत्प्रमाणतत्तल्लोकादिभेदादनन्तम् ॥ यत्र तु लोकस्य कवेश्च प्रसिद्ध्योर्विरोधस्तत्र कविप्रसिद्धिरेव बलीयसी इति । यथा—

'सुसितवसनालंकारायां कदाचन कौमुदी-
महसि सुदृशी स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का[3] क्व नासि शुभप्रदः ॥'

अत्र कीर्तेर्ज्योत्स्नावत्प्रकाशता लोकविरुद्धापि कविसमयसिद्धेत्यदोषः ॥ ननु कथममीषां दोषता आकाङ्क्षादिर्ज्ञाना[4]सत्त्वे शाब्दज्ञान[5]विलम्बादिति चेत् न वाक्यान्तरापेक्षया काव्ये सामग्रीवैलक्षण्यात् । अन्यथा प्रतीतिवैलक्षण्यानुपपत्तेः । तथा चान्वयबोधाकाङ्क्षासत्त्वेऽपि रसोत्पत्त्यनुकूलाकाङ्क्षादिविरहो दोष इति ध्येयम् ॥

संप्रदायानुरोधेन व्याख्यैवं मम वस्तुतः ।
तादृक्काव्यं प्रकुर्वीत यत्रोद्वेगो न धीमताम् ॥

इत्यलंकारशेखरेऽर्थदोषमरीचिः ॥ ६ ॥

---

१. 'यथा तत्र' ख. २. 'कर' ख. ३. 'त्यक्ताशङ्का' क. ४-५. 'ज्ञाना' ख.

सप्तमो मरीचिः ।

'श्लाघ्या गुणाः' इत्युक्तम् । युक्तं चैतत् । यदाह—

'अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।
गुणयोगस्ततो मुख्यो गुणालंकारयोगयोः ॥'

तदुक्तम्—

'अलंकारसहस्रैः किं गुणो यदि न विद्यते ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥'

उक्तं च भगवता—'शब्दार्थौ काव्यस्य शरीरम्, आत्मा रसः, गुणाः शौर्यादिवत् । दोषाः काणत्वादिवत् । अलंकाराः कुण्डलादिवत्' इति ।

तान्विभजते—

**गुणः सामान्यतो द्वेधा शब्देष्वर्थेषु च स्थितः ।
दोषाणामप्यदोषत्वं प्राहुर्वैशेषिकान्गुणान् ॥ १ ॥**

तत्र

**संक्षिप्तत्वमुदात्तत्वं प्रसादोक्तिसमाधयः ।
अत्रैवान्यसमावेशात्पञ्च शब्दगुणाः स्मृताः ॥ २ ॥**

तत्र स्वल्पाक्षरेण भूयोर्थकथनं संक्षेपः । यथा—

'ते हिमाचलमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमाययुः ॥'

श्लाघ्यविशेषणत्वमुदात्तत्वम् । यथा—

'श्रुत्वा यं सहसागतं निजपुरात्त्रासेन निर्गच्छतां
शत्रूणामवरोधनैर्जलभरप्रस्पन्दलिम्पत्पुटाः ।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि
क्रीडाद्रौ नवशाद्वले विचलितग्रीवैर्वियुक्ता दृशः ॥'

अत्र शुभ्रे पल्लविनीत्यादिविशेषणानां श्लाघ्यता ॥

झटित्यर्थप्रत्यायकत्वं **प्रसादम्**[1] । यथा—

'स विश्वजितमारेभे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥'

कौशलादर्थविशेषलाभ **उक्तिः** । यथा—

'कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम् ।
पुनरपि तदेव कथयसि मृतां न कथयामि या श्वसिति ॥

अत्र कुशलमकुशलं वेत्युत्तरे कर्तव्ये जीवतीत्युक्तिविशेषाज्जीवितमात्रं लभ्यते ॥

अन्यधर्माणामन्यत्रारोपणं **समाधिः** । यथा—

'नीलाब्जानां नयनयुगलद्राघिमा दत्तपत्रः
कुम्भावैभौ कुचपरिकरः पूर्वपक्षी चकार ।
भ्रूविभ्रान्तिर्मदनधनुषो विभ्रमानन्ववादी-
द्वक्त्रज्योत्स्ना सितकररुचं[2] दूषयामास तस्याः ॥'

अत्र पत्रदानादिपदानां चेतनधर्माणामारोपणमिति ॥

इत्यलंकारशेखरे शब्दगुणमरीचिः ॥ ७ ॥

अष्टमो मरीचिः ।

इदानीमर्थगुणानाह—

भाविकत्वं सुशब्दत्वं पर्यायोक्तिः सुधर्मिता ।
चत्वारोऽर्थगुणाः प्रोक्ताः परे त्वत्रैव संगताः ॥ १ ॥

संगता अन्तर्भूताः । तदाहुः—

अलंकाराश्रिताः केचिददोषान्तर्गताः परे ।
चतुर्ष्वन्तर्गताः केचिदतश्चत्वार एव ते ॥

तत्र **भाविकत्वम**भिप्रायपूर्वकाभिधानम् । स्वयं दौत्यमिति यावत् । यथा—

'दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यसि ।

---

१. 'प्रसादत्वम्' ख. २. 'रुचिं' क.

एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥'

अत्रोपपत्तिं प्रति संकेताभिप्रायेणैवमभिधानम् ॥

दारुणेऽर्थेऽदारुणपदता **सुशब्दता** । यथा—

देवव्रते वाञ्छति दीर्घनिद्रां द्रोणे च कर्णे च यशोवशेषे ।
लक्ष्मीसहायस्य तवाद्य वत्स वात्सल्यवान्द्रोणिरयं सहायः ॥'

अत्र मुमूर्षति मृते चेत्यर्थे ईदृक्पदता ॥

येन क्रमेण यद्वस्तु, तत्क्रमाभिधानं **पर्यायोक्तिः** । यथा—

'प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥'

यत्र विशेषणद्वारा विशेष्यलाभः, सा **सुधर्मिता** । यथा—

'अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरचक्रद्वन्द्वबन्धुर्विभिन्द-
न्कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥'

अत्र पद्मनीप्रकाशादीनां सूर्यनियतत्वात्तल्लाभः ॥

इत्यलंकारशेखरेऽर्थगुणमरीचिः ॥ ८ ॥

नवमो मरीचिः ।

इदानीं वैशेषिकान्गुणानाह—

पदवाक्यतदर्थेषु ये दोषाः पूर्वमीरिताः ।
तेषां क्वचिददोषत्वं यत्तद्वैशेषिको गुणः ॥ १ ॥

उक्तानामेव दोषाणां विषयावस्थादिभेदाद्यददोषत्वं तदेव वैशेषिको गुण इत्यर्थः ॥

---

१ 'कगुणत्वमित्यर्थः' ख.

केचित्तु—

'एतेषामेव दोषाणां स्थानेष्वेतेष्वदोषता ।
परं न त्वस्ति गुणता पार्थक्यमनयोर्यतः ॥'

अन्ये तु 'क्वचिददोषतामात्रं क्वचिद्गुणतापि[1] । तत्र सहृदयानामेव प्रतीतिः साक्षिणी' ॥

तदाहुः[2]—

'अलंकारे गुणे दोषे रसे वा काव्यसंपदाम् ।
प्रतीतिरेव विदुषां प्रमाणमवसीयते ॥'

श्रीपादस्तु—'रसोत्पत्तिप्रतिबन्धकतयैवैतेषां[3] दोषता । यत्र केनापि निमित्तेन न रसप्रतिबन्धः, तत्रादोषत्वमुचितमेव' इत्याह ॥

तत्र पदेषु यथासंभवमाह—

अनुप्रासेषु नो कष्टं

यथा—'महाराष्ट्रेषु नोष्ट्रिणः' इत्यादौ ॥

श्लेषादौ नाप्रयुक्तता ।

यथा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
योगङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।
यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः
सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदोमाधवः ॥'

अत्र क्षयशब्दो गृहे ॥

मिथः स्तुतो न संदिग्धं

यथा—

'पृथुकार्तस्वरयुक्तं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥'

---

१. 'द्गुण' ख. २. 'तदाह' क. ३. 'तयैषां' क.

न व्यर्थं यमकादिषु ॥ २ ॥

यथा—

'दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशीतलम् ।
बभौ मुखेनाप्रतिमेन काचन श्रियाधिकायां प्रतिमेन काचन ॥'

अत्र चमत्कारः ॥

नाश्लीलं भगवत्पादौ

तदाहुः—

'भगिनीभगवत्पादौ शिवलिङ्गगुहादिषु ।
अभिप्रेतकुमार्यादावश्लीलं नैव दुष्यति ॥'

अश्लीलत्रयमत्रोक्तमिति ध्येयम् ॥

दण्डी तु—

'निष्ठ्यूतोद्गीर्णवान्त्यादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥'

तद्विदेनाप्रतीतकम् ।

यथा—

'सर्वकार्यशरीरेषु मुक्ताङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥'
'सहायाः साधनोपाया देशकालौ बलाबलौ ।
विपत्तेश्च प्रतीकारः पञ्चाङ्गो मन्त्र उच्यते ॥'
'रूपं संज्ञाथ संस्कारो वेदनानुभवस्तथा ।
इति बौद्धाः शरीरेषु मन्यन्ते स्कन्धपञ्चकम् ॥'

इति भार्गवसर्वस्वे ॥

नासाध्वनुकृतौ

यथा—

'हुं हुं हुं न न म मेति युक्त्या जल्पितं जयति मानधनायाः' इत्यादौ ॥

नापि लक्षणादाववाचकम् ॥ ३ ॥

लक्षणादेरशक्य एव वृत्तित्वादिति हृदयम् ॥

इदानीं वाक्येषु यथासंभवमाह—

प्रतीत्यबाधान्न न्यूनं

यथा—

'तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥'

यत्रान्यत्क्रियापदं नास्ति तत्र '[1]अस्तिर्भवतीपरः प्रथमपुरुषो प्रयुज्यमानोऽप्यस्ति' इति न्यायेन यत्र तद्द्वयेन नो[2]पपत्तिस्तत्र तद्दूषणमित्यर्थः। एवं प्रकरणादिना पदान्तरस्य लाभे द्रष्टव्यम्। अत उक्तम्—'प्रतीत्यबाधान्न न्यूनम्' इति।

पादभेदे विसंधि न।

यथा—

'यद्यपि नदति सरोषं मृगपतिपुरतोऽपि मत्तगोमायुः।
तदपि न कुप्यति सिंहो असदृशपुरुषेषु कः कोपः ॥'

इह यद्यपि यदुल्लिखितम् 'संधिविरहो न दोषः' इति, तथाप्यनुशासनविरुद्धत्वात् 'विसदृशपुरुषेषु' इति पठनीयम्।

न व्याकीर्णं तु सापेक्षे

यथा—

'अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥'

इत्यादौ।

नान्यवाक्ये समाप्तता ॥ ४ ॥

समाप्तपुनरात्तकं वाक्यभेदेन दोषः। यथा—

'तं शरैः प्रतिजग्राह कालिङ्गो गजसाधनः।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥'

---

१. 'अस्तिर्भवतिर्वा प्रथमपुरुषे प्रयुज्यते' क. २. 'नापत्ति' ख.

यथा वा—

'न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ॥'

समस्ते यतिभङ्गो न

यथा—

'कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमलमपि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्भूयसे मङ्गलाय ॥'

[1]मत्तादौ नार्थवर्जितम् ।

आदिपदेन वि[2]रहिबालादिपरिग्रहः । यथा—'काकार्यं शशलक्ष्मणः' इत्यादौ ।

विरुद्धं न तथावाक्ये

विरुद्धां धियमुत्पादयत्वित्यभिप्रायेण प्रयोगे तत्र दोष इत्यर्थः ।

वाक्यार्थेषु यथासंभवमाह—

विरसं नाप्रधानके ।

यथा—

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥'

न द्व्यर्थं नर्मणि ग्राम्यं

'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु' इति भरतोक्तेः ।

सर्वत्र हेतुमाह—

रसहानेरयोगतः ॥ ५ ॥

१-२. 'वातादौ' 'विरहवाल' क; 'बालादौ' 'वीरवातुला' ख.

इदानीं सर्वसाधारणमदोषत्वमाह—

तत्र तत्राभिधातव्ये तथानुकरणादिषु ।
उन्मत्ताद्यभिधानेषु कोऽपि दोषो न विद्यते ॥ ६ ॥

श्रीपादास्तु—

'तदर्थातिशये शैघ्र्ये दैन्ये कोपेऽवधारणे ।
विषादे विस्मये हर्षे पुनरुक्तं न दुष्यति ॥'

इत्यलंकारशेखरे वैशेषिकगुणमरीचिः ॥ ९ ॥

इति महाराजाधिराजश्रीमन्माणिक्यचन्द्रकारितेऽलंकारशेखरे गुणरत्नम् ॥

दशमो मरीचिः ।

'अलंकारास्तु शोभायै' इत्युक्तम् । तच्च साधु । यतः—

'गुणवत्यपि निर्दोषेऽलंकारैः काव्यराजनि ।
जायतेऽन्यैव सुषमा रत्नालंकरणैरिव ॥'

आहुश्च—'निर्दोषं गुणवत्काव्यम्' इत्यादि । तत्र चमत्कारविशेषकारित्वमलंकारसामान्यलक्षणम् । शब्दार्थनिष्ठत्वेन विशेषितं विशेषणद्वयम् । परम्परया रसोपकारित्वं तदित्यन्ये ।

तत्र प्रथमं शब्दालंकारान्विभजते—

चित्रवक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः ।
प्रश्नोत्तरं च यमकमष्टालंकृतयो ध्वनौ ॥ १ ॥

तत्र कौतुकविशेषकारि **चित्रम्** । तच्च खड्गचक्रपद्मादिभेदादनन्तम् । यदाह—

'सर्वतोभद्रधेन्वादिगोमूत्रीमुरजादि च ।
गतप्रत्यागताद्याहुश्चित्रकाव्यं मुनीश्वराः ॥'

तच्च माघादौ सुव्यक्तत्वान्नेहोदाह्रियते ।

अन्याभिप्रायेणोक्तं वाक्यमन्येनान्यार्थकतया यद्योज्यते सा **वक्रोक्तिः**। एतदेव वाकोवाक्यमुच्यते । यथा—

'कोऽयं द्वारि हरिः प्रयाह्युपवनं शाखामृगस्यात्र किं
कृष्णोऽहं दयिते बिभेमि सुतरां कृष्णः कथं वानरः ।

---

१. 'प्राचुर्येण व्यक्त' क.

मुग्धेऽहं मधुसूदनो व्रज लतां तामेव पुष्पान्विता-
मित्थं निर्वचनीकृतो दयितया ह्रीणो हरिः पातु वः ॥'

वर्णसाम्यमनुप्रासः । स च द्विविधः—लाटानुप्रासश्छेकानुप्रासश्च तत्रासकृदावृत्तवर्णत्वं[1] लाटानुप्रासः । यथा—

'अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वङ्ग्या कृतार्थयतु मानसम् ॥'

अनेकस्य व्यञ्जनस्य सकृत्साम्यं छेकानुप्रासः । यथा—

'नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविमोक्षमग्नौ ॥'
'पदमेकं हृदा कृत्वा तदनुप्रासकाम्यया ।
आदिक्षान्तलिपौ कादिक्षान्तशब्दं विचिन्तयेत् ॥'

इति रहस्यम् ॥

गूढं क्रियागुप्तादिः ।

यथा—

'पुंस्कोकिलकुलस्यैतैर्नितान्तमधुरारवैः[2] ।
सहकारद्रुमा रम्या वसन्ते कामपि श्रियम् ॥'

इदं च नाना । यदाहुः—

'क्रियाकारकसंबन्धगुप्तान्यामन्त्रितस्य च ।
गुप्तं तथा समासस्य लिङ्गस्य वचनस्य च ॥'

एकोच्चारणापह्नुतभेदत्वं श्लेषः[3] ।

यथा—'येन ध्वस्तमनोभवेन' इत्यादौ । अयं चाष्टधा । यदाह—

'विभक्तिपदवर्णानां लिङ्गस्य वचनस्य च ।
भाषाप्रकृत्योर्भेदेन श्लेषाः स्युः प्रत्ययस्य च ॥'

प्रहेलिका सकृत्प्रश्नः । सा च च्युताक्षरादत्ताक्षरादिः ।

यथा—

'विदग्धः सरलो रागी नितम्बोपरि संस्थितः ।
तन्वङ्ग्यालिङ्गितः कण्ठे कलं कूजति को विटः ॥'

---

१. 'वृत्तो' ख. २. 'अधुः' इति क्रिया. ३. 'श्लेषलम्' ख.

अत्र विट इत्यत्र विकारस्थाने घकारदानद्वितीयोऽर्थो भवति । सा च षोढा । तदाहुः—

'प्रहेलिका सकृत्प्रश्नः सा च षोढा च्युताक्षरा ।
दत्ताक्षरोभयं मुष्टिर्बिंदुमत्यर्थवत्यपि ॥'

प्रश्नोत्तरमपि द्विविधम्—बहिरन्तश्च[1] । तत्र बहिःप्रश्नोत्तरं यथा—

'प्रायः कार्ये नियुज्यन्ते नराः सर्वत्र कीदृशाः ।
धेनेत्ययं[2] भवेच्छब्दो नौवाची वद कीदृशः ॥'

सौवधानाः[3] ।

अन्तःप्रश्नोत्तरं यथा—

'काहमस्मि गुहा वक्ति प्रश्नेऽमुष्मिन्किमुत्तरम् ।
कथमुक्तं न जानासि कदर्थयसि यत्सखे ॥'

अतुल्यार्थत्वे सत्यानुपूर्वीविशेषविशिष्टनियतव्यञ्जनसमुदायाभ्यासो **यमकम्** । यथा—

'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत्ससुरभिं सुरभिं सुमनोभरैः ॥'

तच्चेदं संक्षेपेण सप्ताशीतिप्रकारमिति चान्यत्रविस्तरः । एतच्चित्र एवान्तर्भूतमिति गोवर्धनः ॥

इत्यलंकारशेखरेऽलंकाररत्ने शब्दालंकारमरीचिः ॥ १० ॥

एकादशो मरीचिः ।

अथार्थालंकारान्विभजते—

उपमारूपकोत्प्रेक्षाः समासोक्तिरपह्नुतिः ।
समाहितं स्वभावश्च विरोधः सारदीपकौ ॥ १ ॥
सहोक्तिरन्यदेशत्वं विशेषोक्तिर्विभावना ।
एवं स्युरर्थालंकाराश्चतुर्दश न[4] चापरे ॥ २ ॥

तत्र—भेदे सति साधर्म्यमुपमा । अधिकगुणवत्तया संभाव्यमानमुपमानम् । निकृष्टगुणवत्तया संभाव्यमानमुपमेयम् ।

---

१. 'रन्तरश्च' ख. २. 'नाधे' ख; 'नावे' क. ३. सौ औकारसहितः । अधा धाकाररहितश्च नाः. ४. 'नवा' क.

तां विभजते—

वाक्यार्थातिशयश्लेषनिन्दाभूतविपर्ययाः।
संशयो नियमः स्वं च विक्रियेत्युपमा दश॥ ३॥

तत्र—वाक्यार्थेनैव वाक्यार्थो यदुपमीयते सा **वाक्यार्थोपमा**। सा च द्वयी—प्रत्येकं सादृश्यानपेक्षा तत्सापेक्षा च। आद्या यथा—

'कामिनीनयनकज्जलपङ्कादुत्थितो मदनमत्तवराहः।
कामिमानसवनान्तरचारी कन्दमुत्खनति मानलतायाः॥'

अन्त्या यथा—

'त्वदाननमधीराक्षमाविर्दशनदीधिति।
भ्रमद्भृङ्गमिवालक्ष्यकेशरं भाति पङ्कजम्॥'

अत्रातिशयधर्मोपन्यासः **सातिशयोपमा**।

यथा—

'कल्पद्रुमो न जानाति न ददाति बृहस्पतिः।
अयं च जगतीजानिर्जानाति च ददाति च॥'

पदश्लेषनिबन्धनसाम्यं **श्लेषोपमा**।

यथा—

'तमालपत्राभरणा राजते विलसद्वयाः[1]।
बालेवोद्यानमालेयं सालकाननशोभिनी[2]॥'

यत्रोपमानस्य निन्दया प्रतिक्षेपः सा **निन्दोपमा**।

यथा—

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं जातास्तदुर्वोरुपमानबाह्याः॥'

यत्रासंसृष्टज्ञानेन संसर्गमारोप्य साम्यप्रसञ्जनं सा **भूतोपमा**।

यथा—

'उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥'

---

१. अवस्थापक्षिवाची वयःशब्दः. २. सालानां काननेन, अलकसहिताननेन च.

यत्रोपमानस्यैवोपमेयता सा **विपर्ययोपमा** ।

यथा—

'अथ सुललितयोषिद्भ्रूलताचारुशार्ङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥'

इत्यादौ ।

यत्रोपमानोपमेययोः संशयकोटिता सा **संशयोपमा** ।

यथा—

'किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।
खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ
तडिद्वा तारा वा कनकलतिका वा किमबला ॥'

यत्रेतरव्यावृत्त्या साम्यलाभः सा **नियमोपमा** ।

यथा—

'कस्ते पुरंदरादन्यः प्रतिमल्लो भविष्यति ।
ऋते सहस्रकिरणात्त्वत्प्रतापसमो हि कः ॥'

यत्रोपमानान्तरविरहतात्पर्येण स्वसाम्यं सा **स्वोपमा** ।

यथा—

'आघूर्णितं पक्ष्मलमक्षियुग्मं प्रान्तद्युतिश्वैत्यजितामृतांशु ।
अस्या इवास्याश्चलदिन्द्रनीलगोलामलश्यामलतारतारम् ॥'

अभेदानुमानवदिह भेदो द्रष्टव्यः ॥

अत्रोपमेयमुपमानविकारतयोच्यते सा **विक्रियोपमा** ।

यथा—

'हरिणादथ तन्नयनादथ पद्मात्पद्मपत्राच्च ।
आहृत्य कान्तिसारं विधिरसृजत्सुभ्रुवो दृष्टिम् ॥'

---

१. 'खगौ' ख. २. 'सामान्यं' क.

श्रीपादस्तु—'समभिव्याहारोपमाप्यस्ति' इति ।

यथा—

'प्रकृत्यैव मनोहारि वदनं हरिणीदृशः ।
चन्द्रे ह्लादकता कस्मात्पद्मः केन परिष्कृतः ॥'

अत्र सर्वत्र—

न्यूनाधिकत्वशङ्का चेद्विभागेषु तदिष्यताम् ।
किंचिद्विशेषमादाय भेदो भेदश्च कश्चन ॥
काचित्समस्तान्वयिनी क्रियामात्रान्वया परा ।
विशेषणान्वया काचिदुपमा कापि तत्परा ॥

अत्र च—

न्यूनता साम्यमाधिक्यं यद्यदेवाभिधीयते ।
अहो काव्यस्य माहात्म्यं समतैव प्रतीयते ॥

तदाह राजशेखरः—

'समानमधिकं न्यूनं सजातीयं विरोधि च ।
सकुल्यं सोदरं कल्पमित्याद्याः साम्यवाचकाः ॥
अलंकारशिरोरत्नं सर्वस्वं काव्यसंपदाम् ।
उपमा कविवंशस्य मातैवेति मतिर्मम ॥'

इत्यलंकारशेखरेऽर्थालंकारे उपमामरीचिः ॥ ११ ॥

द्वादशो मरीचिः ।

अतिसाम्यादपह्नुतभेदयोरुपमानोपमेययोरभेदप्रत्ययो रूपकम् ।

यदाह—

'तद्रूपकमभेदो यदुपमानोपमेययोः ।' इति ।

दण्डिनोऽप्याहुः—

'उपमैव तिरोभूतभेदा रूपकमुच्यते ।' इति ।

तद्विभजते—

विरुद्धं च समस्तं च व्यस्तं रूपकरूपकम् ।
श्लिष्टं च रूपकं तस्मात्संक्षेपात्पञ्चधा स्मृतम् ॥ १ ॥

तत्र—यत्रोपमानविरुद्धोऽर्थस्तद्विरुद्धम् ।

यथा—

'दिवा न परिभूयते न च मनागपि क्षीयते
न वा चरमवारिधेः पयसि लुप्तिमाविन्दति।
न च त्रिदशसुभ्रुवां वदनकान्तिभिर्जीयते
यशस्तुहिनदीधितिर्जयति कोऽपि भूमीपतेः[1] ॥'

समस्तं यथा—

'तस्या बाहुलता पाणिपद्मं चरणपल्लवम्।
मुखेन्दुरक्षिभ्रमरौ सर्वस्वं पुष्पधन्वनः ॥'

व्यस्तं यथा—

'भुजौ मृणाले वदनं सुधांशुः कुन्दानि दन्ताश्चरणौ सरोजे।
सितं प्रसूनानि करौ प्रवाले पयोधरौ भूमिधरौ मृगाक्ष्याः ॥'

रूपकरूपकं यथा—

'मुखपङ्कजरङ्गेऽस्मिन्भ्रूलतानर्तकी तव।
नरीनर्ति लसत्स्वर्णकेतकीदललोचने ॥'

श्लिष्टरूपकं यथा—

'राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम्।
पुष्णाति सुषमां कांचिन्मुखपङ्केरुहं तव ॥'

इदं च समस्तासमस्तादिभेदादनन्तम्। लक्षणाप्यत्रैवान्तर्भवति, उपमानोपमेययोरभेदप्रतिपत्तेरत्रापि सत्त्वात्।

तदुक्तम्—

'रूपकं लक्षणादिकम्' इति। सा च द्विधा—समस्तासमस्तभेदात्।

तत्राद्या यथा—

'उदयति कनकाचलयोरुपरि चलत्पङ्कजश्चन्द्रः[2]।
तदुपरि घनान्धकारः कस्य कृते धातुरीदृशी सृष्टिः ॥'

---

१. 'भृतः' ग. २. 'त्सङ्गज' क.

अन्त्या यथा—

'तामरसे सालसता[1] जलमुचि कश्चिद्विपर्यासः ।
निस्यन्दता लतायां कथयति कस्यापि पुण्यानि ॥'

इत्यलंकारशेखरे रूपकमरीचिः ॥ १२ ॥

त्रयोदशो मरीचिः ।

अन्यनिमित्तके वस्तुन्यन्यनिमित्तकत्वारोपं[2] **उत्प्रेक्षा** ।

यथा—

'गमनमलसयातैः कुम्भलक्ष्मीं कुचाभ्या-
मविकलकरशोभामूरुकाण्डद्वयेन ।
यदि यमहरदेषां हेतुनानेन नूनं
निजवपुषि करीन्द्राः पांशुपूरं क्षिपन्ति ॥'

इयं च

सर्वालंकारसर्वस्वं कविकीर्तिविवर्धिनी ।
उत्प्रेक्षा हरति स्वान्तमचिरोढास्मितादिव ॥
शङ्के मन्ये ध्रुवं प्रायो नूनं जानामि तर्कये ।
इवेत्यादिभिरुत्प्रेक्षा व्यज्यते काव्यवर्त्मनि ॥

अन्यदेवाभिप्रेत्यान्याभिधानं **समासोक्तिः** । सैव चान्यापदेश इत्युच्यते ।

यथा—

'त्वं पीयूष दिवोऽपि भूषणमसि द्राक्षे परीक्षेत को
माधुर्यं तव विश्वतोऽपि विदिता माध्वीक साध्वी कथा ।
एतत्किंतु तवाप्यरुंतुदमिव ब्रूमो न चेत्कुप्यसे
यः कान्ताधरपल्लवे मधुरिमा नान्यत्र कुत्रापि सः ॥'

किंचिदपह्नुत्य यदन्यार्थप्रदर्शनं[3] **सापह्नुतिः** ।

यथा—

'सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ।
नागरिकः किमु मिलितो नहि नहि सखि हैमनः पवनः ॥'

---

१. 'सारसता' ख. २. 'रोपणमु' क. ३. 'प्रकाशनं' ग.

'कलमधुरं किल कूजन्यमुनाकूलेषु नीलघनदेहः ।
दृष्टः सखि गोपालो नहि नहि सखि कोकिलो दृष्टः ॥'

आरब्धानुकूलाकस्मिकसहकारिलाभः **समाहितम्** ।

यथा—

'मानापनोदनविधौ मदिरेक्षणाया
यावन्नमामि चरणावथ तावदेव ।
नीपस्खलन्नवसमीरपुरःसराणि
प्रादुर्बभूवुरचिराद्धनगर्जितानि ॥'

यस्य वस्तुनो यत्स्वभावता तदाख्यानं **स्वभावः**। तदेव **जातिरित्युच्यते** ।

यथा—

'चलति कथंचित्पृष्टा यच्छति वाचं कथंचिदालीनाम् ।
आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः ॥'

विरोधो द्विविधः—पारमार्थिकाविरोधे[1]ऽपि औचित्येन विरुद्धतया प्रतीयते यत्र[2] ।

यथा—'मनीषिताः[3] सन्ति गृहेषु देवताः' इत्यादौ ।

द्वितीयस्तु यथाश्रुते विरोधसंधानेऽपि यत्राभिप्रेतार्थमादाय विरोधः । अयमेव **विरोधाभास** इत्युच्यते यथा—

'भक्तानां कामदस्तुष्टो रुषा कामं दहन्नपि ।
अपि ज्ञानमयस्थाणुर्यस्तमीशं स्तुवीमहि ॥'

उत्तरोत्तरं यत्र सारोत्कर्षः स **सारः** ।

यथा—

'विषयेषु तावदबलास्तास्वपि गोप्यः स्वभावमृदुवाचः ।
मध्ये तासामपि सा तस्या अपि साचि वीक्षितं किमपि ॥'

समस्तवाक्योपकरणत्वं[4] **दीपकत्वम्** । तच्च[5] भिन्नमभिन्नं च ।

---

१. 'धोपि' क-ग २. 'यत्र' नास्ति क. ३. 'तामर्चे' क. ४. 'कारणत्वं' क. ५. 'तच्चाभिन्नतत्तत्कारक' क.

अभिन्नं यथा—'पाणौ पद्मधिया मधूककुसुमभ्रान्त्या च गण्डस्थली' इत्यादौ। तत्तत्कारकक्रियादिभेदादनन्तम्।

भिन्नं यथा—

'नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः।
बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः॥'

अत्र विस्तरभिया[1] सर्वं नोदाह्रियते। एतच्च मालादीपकादिभेदादनन्तम्।

अत्र पूर्वापरवाक्यार्थयोरुपकार्योपकारक[2]शृङ्खला **मालादीपकम्**।

तत्रोत्तरस्य पूर्वोपकारकत्वं यथा—

'चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदस्तमपि वल्लभसङ्गः॥'

पूर्वस्योत्तरोपकारकत्वं यथा—

'संग्रामाङ्गणमागतेन भवता चापे समासादिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्॥'

समानकालोक्तिः **सहोक्तिः**। सा द्वयी—उदासीनयोस्त्वराप्रतिपत्तये, कार्यकारणयोरपि।

आद्या यथा—

'सहदीर्घा मम श्वासैरिमाः संप्रति रात्रयः।
समं मम शरीरेण क्षीयन्ते दिवसा अमी॥'

अन्त्या यथा—

'वर्धते सह पान्थानां मूर्च्छया चूतमञ्जरी।
पतन्ति च समं तेषामश्रुभिर्मलयानिलाः॥'

प्रयोज्यप्रयोजकयोर्वैयधिकरण्यम**न्यदेशत्वम्**।

यथा—

'सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।

1. 'भयात्' क-ग. 2. 'पकारकं माला' ख.

साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स इत्यद्भुतम् ॥'

कारणे सत्यपि कार्याभावो **विशेषोक्तिः**।

यथा—

'आवाति वारिधरशीकरवारिवर्षी
स्वैरं कदम्बवनदुर्ललितः समीरः।
अङ्गेऽर्पितानि नलिनीनवपल्लवानि
तापस्तथापि सुदृशः शिथिलो न जातः ॥'

कारणं विना कार्योदयो **विभावना**।

यथा—

'नाङ्गेषु रत्नाभरणानि सन्ति निश्वासहार्याण्यपि नांशुकानि।
तथापि सा संप्रति सारसाक्षी दिने दिने कामपि कान्तिमेति ॥'

केचित्तु—

अन्यदेशत्वमेव विशेषोक्तिविभावने अधिकरणद्वयमादाय।

अन्ये तु—

'अनयोरेवैकेनापरस्यान्यथासिद्धिर्व्यतिरेकमादाय' इति।

गोवर्धनस्त्वाभ्यामेवान्यथासिद्ध्यान्यदेशत्वमेव निराचकार। **व्यतिरेकालंकारस्त्वतिरिच्यत** इत्येके। स च यथा—

'कादाचित्कीं द्युतिं धत्ते कलङ्की क्षीयतेऽन्वहम्।
दोषाकरः कथंकारं त्वदाननसमः प्रिये ॥'

एकेनाप्रस्तुतस्यासिद्धिराक्षेपः। सोऽपि पृथगित्यपरे।

यथा—

'इन्द्रेण किं स यदि कर्णनरेन्द्रसूनु-
रैरावतेन किमसौ[2] यदि तद्द्विपेन्द्रः।
दम्भोलिनाप्यलमयं यदि तत्प्रतापः
स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरी सा'

---

१. 'स्लन्यामेव' क. 'स्लाद्यामेव' ग. २. 'किमहो' ग.

सुखबोधाय बालानामतिकोमलवर्त्मना।
मया संक्षेपणादित्थमलंकाराः प्रदर्शिताः॥
यथैतेषां मिथो भेदः परेषां नातिरेकिता।
तथालंकारसर्वस्वे स प्रपञ्चमदर्शयम्॥
इति[1] केशवमिश्रकृतेऽलंकारशेखरेऽलंकाररत्नम्[2]।

'उपमा काव्यसंपदाम्। सर्वस्वं सा च साधर्म्यम्' इतीदानीं तस्य प्रतियोग्यनुयोगिनावाह—

चन्द्रकलाम्बुजदामशिरीषं विद्युत्ताराकनकलता च।
दमनककाञ्चनयष्टी दीपः सर्वैरेभिर्योषिद्वर्ण्या॥ १॥

यथा—

'शि[3]खेव दीपस्य लतेव हैमी कलेव चान्द्री स्रगिवाम्बुजानाम्।
शिरीषपुष्पं स्मरहेमयष्टी सा मे कदा लोचनगोचरा स्यात्॥'

'दमनकतरुशाखालम्बिरोलम्ब[4]युग्मं
तुहिनकिरणबिम्बे खञ्जरीटप्रचारः।
विकचकमलकोशे दाडिमीबीजपङ्क्ति-
स्मितयमिदमपूर्वं दृष्टमेकत्र चित्रम्॥'

'तडिद्वा तारा वा' इत्यादि। 'उद्भिन्नया रत्नशलाकया वा' इत्यादि-दर्शनात्तथात्वं वर्ण्यते इत्याहुः।

अत्यन्तानन्दसंदोहदायिनी परिवर्ण्यते।

योषिदित्यनुवर्तते। यथा—

'सा कौमुदी नयनयोरमृतैकवर्ति-
रानन्दपङ्कजवती विलसत्तडागः।
प्राणाः स्मरस्य जनपुण्यतरोः फलानि
साफल्यमक्षिजनुषां क्व गता न जाने॥'

'शक्तिर्मूर्तिमयी स्मरस्य जगतां नारीमयं मण्डलं
कान्तानामुपमानकल्पनकलाकान्तेः समुत्तेजनम्।

१. 'इत्यलंकार' ग. २. 'रत्नं चतुर्थम्' क. ३. 'शिखीव' ग. ४. 'जम्बीरयुग्मं' ग.

लक्ष्मीः संसृतिसागरस्य सरसी लावण्यपुण्याम्भसां
सा राजव्रजचक्षुषां क्षणमभूदानन्दपुण्यस्थली ॥'

रोचना स्वर्णविद्युद्भिर्हरिद्राभिर्वराटकैः ।
चम्पकैर्हैमकैतक्या वर्ण्यते तत्तनोर्द्युतिः ॥ २ ॥

यथा—

'प्रत्यग्रपद्मबीजद्युति काञ्चनकेतकच्छायम् ।
गोरोचनातिगौरं वपुरथ साक्षात्कृतं तस्याः ॥
चम्पकदामहरिद्राकाञ्चनसौदामिनीनां च ।
ह्रेपयति कान्तिमेषा निजवपुषा पद्मपत्राक्षी ॥'

इदमुपलक्षणम्—'तामग्रतस्तामरसान्तराभाम्' इत्यादेः ।

'वेत्रत्वचा तुल्यरुचा वधूनां कर्णान्ततो गण्डतलागतानि ।
भृङ्गाः सखेलं यदि नापतिष्यन्कोऽवेदयिष्यन्नवपङ्कजानि ॥'

इत्यादेः । 'मोचात्वचः पञ्चषपाटनानाम्' इत्यादेश्च ।

'काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो मणिमञ्जरीभिः ।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां प्रयाति ॥'

इत्यादेश्च तत्तत्साम्यमपि बोध्यम् ।

तमःशैवालपाथोदबर्हभ्रमरचामरैः ।
यमुनावीचिनीलाश्मनीलाब्जाभ्रैः समः कचः ॥ ३ ॥

यथा—

'न जीमूतच्छेदः स हि गगनचारी न च तमो
न चास्येन्दोर्मैत्री न च मधुकरास्ते हि मुखराः ।
न पिच्छं तत्केकिन्युचितमसितोऽयं न च मणि-
र्मृदुत्वादा ज्ञातं घनचिकुरपाशो मृगदृशः ॥'

---

१. 'मोचत्वचः' क-ग.

'जानामि जानकि कलिन्दसुताजलेऽसि-
न्स्नातासि हन्त यदिमास्तव कुन्तलानाम् ।
वीचीषु नीलकमलस्रजि शैवलेषु
दृश्यन्त एव रुचयः कणशो विकीर्णाः ॥'
'तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम् ।
आकण्ठमक्ष्णोर्द्वितयं मधूनि मही[1]भुजः कस्य न भोजयन्तीम् ॥'
'[2]कूर्पासेन स्थगितहृदया संपुटे हा[3]टकीयं
[4]न्यस्ताञ्चलनिवसना चामरं वारिदाभम् ।
यत्र लीना रतिरिव वणिक्प्रेयसी वीथिकायां
विक्रीणीते मुकुलितमुखी संज्ञया मौक्तिकानि ॥'

इ[5]दमुपलक्षणम् ।

'पुनः पुनः काचन कुर्वती कचच्छटाधिया धूपजधूमसंग्रहम् ।
सखीस्मितैस्तर्किततन्निजभ्रमा बबन्ध तन्मूर्धनि चामरं चिरात् ॥'

इति धूमसाम्यमपि बोध्यम् ।

'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ।'

इति रहस्यम् ।

ललाटमर्धचन्द्रेण हेमपट्टिकया तथा ।

'केशान्धकारादथ दृश्यभालस्थलार्धचन्द्रा स्फुटमष्टमीयम् ।
एनां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधुः ॥'
'अधस्तादन्धकाराणामुपरिष्टात्कुरङ्गयोः ।
सिन्दूरबिन्दुसुभगा दृष्टा काचन पट्टिका ॥'

वल्लीस्मरधनुर्वीचिभृङ्गालीपल्लवैर्भ्रुवौ ॥ ४ ॥

---

१. 'भृतः' क. २. 'कुर्यासेन' ख-ग. ३. 'हाटकेयम्' ख-ग. ४. 'हस्तन्यस्ता ज्वलति वसना' ग. ५. 'अङ्गुल्या यदि निर्दिशेदरुणिमा लाक्षागुटी विभ्रमं वाचा यद्यथ शुद्धपारदवटीबुद्धिं रदस्य द्युतिः । दृग्भङ्ग्या यदि नीलिमा वितनुते काचस्रजः प्रत्ययं विक्रेतुं बत मौक्तिकानि भवति व्यग्रा वणिक्प्रेयसी ॥' इत्यपीतः प्राक्क्वचित्.

यथा—

'अथ सुललितयोषिद्भ्रूलता चारुभृङ्गम्' इत्यादि।

'श्यामास्वङ्गं चकितहरिणीप्रेक्षणे[2] दृष्टिपातं
गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि[3] प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्य क्वचिदपि न ते चण्डि[4] सादृश्यमस्ति॥'

'भ्रूपल्लवं मधुपराजिरुचां निधिस्ते
गण्डस्थली कनकदर्पणदर्पहन्त्री।
हे कम्बुकण्ठि शुककिन्नरहंसवाणि
प्राणा ममासि मदनस्य च जैत्रमस्त्रम्॥'

चन्द्रादर्शौ कपोलस्य

सुव्यक्तमव्यवहितश्लोकद्वये।

इदमुपलक्षणम्—

'मधूककुसुमभ्रान्त्या पुनर्गण्डयोः' इत्यादेस्तथात्वमपि[5]।

मुखस्येन्द्वब्जदर्पणाः।

यथा—

'किमिन्दुः किं पद्मम्' इत्यादौ।

तिलप्रसूनं नासायाः

यथा—

'बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
र्गण्डश्चण्डि चकास्ति नील[6]नलिनश्रीमोचनं लोचनम्।
नासान्वेति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः॥'

कामतूणीकृत्य नासा वर्ण्यत इति श्रीहर्षः। 'नासावंशो मृगीदृशाम्' इत्यप्यस्ति। 'नासानाली तिलोपमा' इत्यपि पठन्ति।

---

१. 'शार्ङ्ग' ग. २. 'प्रेक्षिते' ग. ३. 'तत्पश्यामि' ख. ४. 'भीरु' ख. ५ 'इत्यादिदर्शनान्' ग. ६. 'नाल' क.

कण्ठः कम्बोः समः स्मृतः ॥ ५ ॥

यथा—

'हे कम्बुकण्ठि' इत्यादौ 'कम्बुग्रीवे तद्धदेवाष्टमान्त्ये' इत्यादौ।

मृग तन्नेत्रपाथोऽज तत्पत्रझषखञ्जनैः।
नेत्रं चकोर तन्नेत्रकेतकालिस्मराशुगैः ॥ ६ ॥

यथा—

'चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष दृष्टः[1]।
सारः सुधोद्धारमयः प्रयत्नै[2]र्विधातुमेतन्नयने विधातुः ॥'

'हरिणादथ तन्नयनादथ पद्मात्पद्मपत्राच्च[3]'।

'किमब्जे किं मीनौ' इत्यादि।

'नयने खञ्जनकमले बाहू विलसन्मृणालबिसखण्डे।
वपुरपि शिरीषकुसुमं[4] मुखमिन्दुस्त्वं शरल्लक्ष्मीः ॥'

'चकार सा मत्तचकोरनेत्रा विलोलनेत्रा भ्रमरैर्गवाक्षान्[5]।
पूर्णान्दलैः काञ्चनकेतकीनामहो वधूनां पृथगेव सृष्टिः[6] ॥'

केचित्तु—

'कोशातकी पुष्पगुलुच्छकान्तिभिर्मुखैर्विनिद्रोल्बणबाणचक्षुषः।
ग्रामीणवध्वस्तमलक्षिता जनैश्चिरं धूर्तीना[7]मुपरि व्यलोकयन् ॥'

इति माघदर्शनात्कोशातकीत्वेन मुखम्, बाणत्वेन वर्णनीयमिति वदन्ति।

अन्ये तु—

'तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्याः।
प्रसन्नचेतः सलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः ॥'

इति दर्शनात् 'नेत्रं कुमुदोपमेयम्' इत्याहुः॥

प्रवालबिम्बबन्धूकपल्लवैरधरोष्ठकौ।
वर्ण्यौ माधुर्यमाश्रित्य यावन्मधुरवस्तुभिः ॥ ७ ॥

---

१. 'कृष्टः' क. २. 'प्रयासैः' ख. 'प्रयत्नात्' ग. ३. 'इत्यादि' ग. ४. 'पुष्पं' ग. ५. 'गवाक्षाः। पूर्णा' ग. ६. 'दृष्टिः' ग. ७. 'व्रतीना' क; 'वृत्तीना' ख.

यथा—

'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततो न कुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य॥'

'तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणप्रेक्षणा[1] निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥'

'बन्धूकद्युतिबान्धवोऽयमधरः' इत्यादि। जवाप्यत्र गणनीयेति गोवर्धनः॥

माधुर्यमाश्रित्येति।

यथा—

'त्वं पीयूषदिवो वि[2]भूषणम्[3]' इत्यादौ॥

मुक्तामाणिक्यनारङ्गदाडिमीकुन्दकोरकैः।
ताराभिश्च रदाः

यथा—

'कूर्पासेन स्[4]थगितहृदयः' इत्यादि। 'तन्वी श्यामा शिखरदशना' इत्यादि।

'तद्दन्ता नागरङ्गानि च्छोलङ्गानि पयोधरौ।
ओष्ठाधरौ च बिम्बानि सा मे फलमयी प्रिया॥'

दमनकेत्यादि। बन्धूकद्युतीत्यादि।

तत्कोरकैर्यथा—

'अधरः किसलयमङ्गी पद्मौ कुन्दस्य कोरका दन्ताः।
कः कौ के कं कौ कान्प्रहसति हसतो हसन्ति हरिणाक्ष्याः॥'

'तारा रदानाम्' इत्यादि॥

वाणी हंसालीशुककिन्नरैः।
वेणुकोकिलवीणाभिर्माधुर्यं मधुरैः सह॥ ८॥

---

१. 'प्रेक्षणी' ख. २. 'पि' ख. ३. 'मासि' ग. ४. 'स्थगितहृदय' इति न. ख. 'हृदय' इति न. ग.

यथा—

'हे कम्बुकण्ठि शुककिन्नरहंसवाणि' इत्यादि ।

'तस्य गोप्तुर्द्विरेफाणां कर्णोत्पलनिपातिनाम् ।
स्वरसंवादिभिः कण्ठैः शालिगोप्यो जगुर्गुणान् ॥'

'कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत यत्र कापि नलेन बाला कलमालपन्ती ॥'

माधुर्यमिति ।

'मधुद्रोणीव मन्दारमरन्दामन्दवृष्टिवत् ।
सुधासारद्रवद्राक्षागोणी वाणी तव प्रिये ॥'

बाहुर्बिसेन विद्युद्वल्लिमृणालैः

बिसमृणालयोरवान्तरविवक्षयेदम् ।

यथा—

'अस्या भुजाभ्यां विजिताद्बिसात्किं पृथक्करोऽगृह्यत तत्प्रसूनम् ।
इहेक्षते तन्न गृहाः श्रियः कैर्न गीयते वा कर एव लोकैः ॥'

'विद्युन्मृणालसुभगा बाहुवल्ली मृगीदृशः ।
यूनां तु कण्ठकाण्डेषु जाता कनकशृङ्खला ॥'

करस्तु पद्मेन ।

पल्लवविद्रुमकाभ्यां

'करकिसलयेन सुदृशां रागसरित्पङ्कजेनेव ।
शिथिलितविद्रुममहसा स्पृष्टोऽहं चेतनां न लभे ॥'

चन्द्रकलाकुन्दकोरकैश्च नखाः ॥ ९ ॥

यथा—

'निर्भर्त्सिताशोकदलप्रसूति पाणिद्वयं चारुनखं तदीयम् ।
नवोदितेन्दुप्रतिमस्य लेखां व्योम्नः प्रदोषे विफलीचकार ॥'

'निर्दोषरत्नसुभगैः कुन्दकोरककान्तिभिः ।
नखैः कमलपत्राणि चक्रे बाला पृथक्पृथक्' ॥

---

१. 'यशः' ख.

पूगाब्जतत्कोरकबिल्वतालगुच्छेभकुम्भाद्रिघटेशचक्रैः।
सौवीरजम्बीरकबीजपूरसमुद्गछोलङ्गफलैरुरोजः॥ १०॥

यथा—

'कनकक्रमुकायितं पुरस्तादथ पङ्केरुहकोरकायमाणम्।
क्रमशः कलशायमानमास्ते सुदृशो वक्षसि कस्य भागधेये॥'

'कलशीयति कुचकमलं कमलीयति लोचनभ्रमरः।
द्व्यणुकीयति[1] पुनरस्या हरिणदृशः प्रत्यहं मध्यः॥'

'स्तनबिल्वद्वयी तस्याः प्रययौ चक्रवाकताम्।
उड्डीय पुनरद्रीणां जहार विपुलां श्रियम्॥'

'चिरप्रवासिंस्तव वाटिकायां बिभर्ति चत्वारि फलानि वीरुत्।
सौवीरजम्बीरकबीजपूरतालान्यसौ धास्यति किं न जाने॥'

'घटौ वा गुच्छौ वा' इति।

'स्वयंभूः शंभुरम्भोजलोचने त्वत्पयोधरः।
नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति॥'

'संपुटं हाटकीयम्' इत्यादि। 'दमनकतरुशाखालम्बि छोलङ्गयुग्मम्' इत्यादि।

'महतोऽपि महीयांसमणीयांसमणोरपि।
त्वत्प्रतीकं विदुर्नूनमणुमध्ये नगस्तनि॥'

'रेखाकारातिसुश्यामा रोमालिस्तेन तादृशैः।
शैवालधूमभृङ्गालिलताद्यैरुपमीयते॥'

सुगममिदम्।

नाभीरसातलावर्तह्रदकूपनदादिभिः।

यथा—

'मदनसरितमेतां गाहमानो जनोऽयं
जघनपुलिननाभीमण्डलावर्तरम्यम्।

---

१ 'अणुकीयति' ग. २. 'कान्ता' ग.

मुखकमलसनाथामुल्लसद्भ्रूलतोर्मि
चिरविरहहुताशा या समुज्झांचकार ॥'
'त्वन्नाभिकूपः पातालं नितम्बस्तव मेदिनी ।
पयोधरस्ते हेमाद्रिस्त्वं ममासि जगत्त्रयम् ॥'
'ह्रदनद्रसरांसि नाभिस्त्रिवली तटिनी रसात्मकं च वपुः ।
तदपि तलोदरि सुन्दरि कथमिव संतापं तनुषे ॥'

वली तटिन्या तद्रूपैः

तत्समैः पाशादिभिः । स्तदाह—'त्रिवलीपाशैस्तथा तथा नद्धः' । 'कामेन सोपानमिव प्रयुक्तम्' इति च ।

पृष्ठं काञ्चनपट्टकैः ॥ ११ ॥

यथा—

'मुक्तावलिस्ते रदनाः पृष्ठं काञ्चनपट्टकम् ।
नखांशवस्ते रत्नानि मध्ये क्षीणासि किं प्रिये ॥'

शूच्यग्रतलशून्याणु वेदी सिंहादिभिः समः ।
मुष्टिग्राह्यो भवेन्मध्यः

अत्र मध्यस्यातिसूक्ष्मत्वात्तत्प्राधान्येनोपमानता । अत एव मुष्टिग्राह्यता तलपरिमाणता च । सूक्ष्मत्वादेव मध्ये शून्यतापि । अत एव 'सदसत्संशयगोचरोदरि' इत्यपि वर्णयन्ति ।

जघनं पुलिनोपमम् ॥ १२ ॥

यथा—

'मदनसरितमेताम्' इत्यादि ।

पीठप्रस्तरभूचक्रैर्नितम्बः परिवर्ण्यते ।

यथा—

'नितम्बः स्वर्णपीठं ते तवाङ्गुलयश्च पल्लवाः ।
ज्योत्स्नेन्दुपुष्पपीयूषफेनकान्ति स्मितं तव ॥'
'तपनीयशिला शोभा' इत्यादि । 'नितम्बस्तव मेदिनी' इत्यादि ।

'चक्रेण विश्वं युधि पुष्पकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ॥'

'बिभ्रम्य तच्चारुनितम्बचक्रे' इति नैषधात् 'रथचरणविशालश्रोणि लोलेक्षणेन' इति माघाच्च । चक्रान्तरद्वयसाम्यमत्र ।

ऊरुस्तु करिहस्तेन कदल्या करभेण च ॥ १३ ॥

यथा—

'कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेन बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥'

चरणः पल्लवाम्भोजस्थलपद्मप्रवालकैः ।

यथा—

'विजितप्रवालपल्लवकवलीकृतप्रोल्लसत्सुमे ।
पदकमले कमलाया लुठदलकः पातु देवकीसूनुः ॥'

'अभ्युन्नताङ्गुष्ठनखप्रभाभिर्विक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम् ॥'

पूर्णेन्दुनाङ्गुष्ठनखौ

यथा—

'यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या ।
कलाश्चतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम् ॥'

गमनं हंसहस्तिवत् ॥ १४ ॥

यथा—

'गमनमलसयातैः' इत्यादि ।

'सा राजहंसैरिव संनताङ्गी गतेषु लीलाञ्चितविभ्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरशिञ्जितानि ॥'

कटाक्षो यमुनावीचिभृङ्गावलिविषामृतैः ।

यथा—

'हालाहलं वा विलसत्सुधा वा भृङ्गावली वा यमुनोर्मयो वा ।
निशाणघृष्टा मदनेषवो वा यद्वा कटाक्षो मदिरेक्षणायाः ॥'

---

१. 'नास्यां' ख. २. 'तस्याम्' ख.

ज्योत्स्नेन्दुपुष्पपीयूषफेनकैरववद्धसः ॥ १५ ॥

हसो हास्यम् ॥

यथा—'ज्योत्स्नेन्दुपुष्प-'इत्यादि ॥

'नूनं ते चोरिता तन्वि स्मितेक्षणमुखद्युतिः ।
स्नातुमम्भःप्रविष्टायाः कुमुदोत्पलपङ्कजैः ॥'

मुक्ताप्यत्र गणनीया ।

'मुक्ताफलं वा स्फुटविद्रुमस्थम्' इत्यादेः ॥

दर्शनं वमदब्जादिः

यथा—

'धवलयदिव जगदखिलं प्लावयदिव विश्वमेव विशिखौघैः[1] ।
वमदिव कमलसहस्रं लोचनमेणीदृशो जयति ॥'

श्वासस्तु सुरभिः शनैः ।

यथा—

'वहन्ति प्रातरम्भोजसौरभोद्गारवासिताः ।
मन्दमन्दममी वाता निश्वासास्तावका इव ॥

हंससारसशब्दाभ्यां वर्ण्यते नूपुरध्वनिः ॥ १६ ॥

यथा—'सा राजहंसैः' इवेत्यादि ।

'लीलाचलस्त्रीचरणारुणोत्पलस्फुरत्तुलाकोटिनिनादकोमलः ।
सौरेरुपानूपमुपाहरन्मनःस्वरान्तरादुन्मदसारसारवः ॥'

अत्र श्रीपादानुसारिकविकल्पलताकार एतावदधिकमाह—

'वेण्याः सर्पासिभृङ्गाल्योर्धम्मिल्लस्य विधुंतुदः ।
सीमन्तस्याध्वदण्डौ च भ्रुवोः सर्पीकृपाणकौ ॥
दन्तस्य जीरका ज्ञेया मदिरा कुमुदं दृशोः ।
जिह्वायास्त्वञ्चलो दोला नासायाः पाटली तथा ।
वल्लरी लहरी पाशः शाखा बाहुद्वयस्य च ॥

1. 'विघैः' क. 'विषैः' ग.

प्रवालशाखा वाङ्गुल्याः पल्लवश्च नखस्य तु ।
रक्तपुष्पाणि नाभ्यास्तु विवराम्भोरुहे समे ।
वीचिसोपाननिश्रेण्यस्त्रिवल्ल्या इति च स्त्रियाम् ॥
पुंसां तु वृषरक्ताक्षस्कन्धौ स्कन्धस्य संनिभौ ।
भुजौ वज्रस्य गमनमुक्ष्णामित्यभिकीर्तितम् ॥

गोवर्धनस्तु शरीरतदवयवयोर्वर्णनीयान्गुणानाह—

सौन्दर्यं मृदुताकार्श्यमतिकोमलता तथा ।
कान्तिरौज्ज्वल्यमाबल्यमित्यमी वपुषो गुणाः ॥
केशस्य दीर्घकौटिल्यमृदुनैबिड्यनीलता ।
कपोले स्वच्छता कण्ठे द्राघीयस्त्वं त्रिरेखता ॥
नेत्रे स्नैग्ध्यं विशालत्वं लोलतापाङ्गदीर्घता ।
नीलता प्रान्तलौहित्यं श्वैत्यं निबिडपक्ष्मता ॥
अधरेऽत्यन्तमाधुर्यमुच्छूनत्वं सुरक्तता ।
दन्तस्य श्वैत्यलौहित्यद्वात्रिंशत्तातिदीप्तता ॥
माधुर्यं स्पष्टता वाचां मृदुता समता भुजे ।
करेऽतिमृदुता शैत्यं सर्वभागे च शोणता ॥
स्तने श्यामाग्रतौन्नत्यविस्तारदृढपाण्डुता ।
रोमाल्या मार्दवं सौक्ष्म्यं श्यामता नाभिगामिता ॥
कान्तिर्वृत्तानुपूर्वत्वं जङ्घयोर्नातिदीर्घता ।
अत्यन्तमन्दता शैत्यं निश्वासेऽतिसुगन्धिता ॥

इत्यादि ।

मया संक्षेपशीलेन गच्छता मृदु वर्त्मनि ।
सर्वशिष्टानुरोधेन दिङ्मात्रमिह दर्शितम् ॥

इत्यलंकारशेखरे वर्णकरत्ने योषिद्वर्णनमरीचिः ॥ १३ ॥

चतुर्दशो मरीचिः ।

इदानीं पुरुषवर्णनमाह—

राज्ञामत्यन्तपीनत्वमुच्चता दीर्घबाहुता ।

अत्र पुंसामिति वक्तव्ये प्रायशः कवीनां राजान एव वर्णनीया भवन्तीतिताननुगृह्णता महर्षिणा राज्ञामित्युक्तम् ।

यथा—

'व्यूढोरस्को वृषस्कन्धः शालप्रांशुः' इत्यादौ ।

युगार्गलभुजङ्गेन्द्रदण्डस्तम्भेभहस्तकैः ॥ १ ॥

बाहुः

यथा—

'युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः ।'

'भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ।'

'अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ॥'

'नागेन्द्रगमनः पीनमैरावतकरायतम् ।
दोर्दण्डभुवनागारस्तम्भं राजा ममर्श सः ॥'

वक्षःकपाटेन शिलापट्टेन वर्ण्यते ।

यथा—

'तस्याभवत्सूनुरुदारशीलः शलः शिलापट्टविशालवक्षाः ।
जितारिपक्षोऽपि शिलीमुखैर्यः [1]शालीनतामाव्रजदीड्यमानः ॥'

अंसे विपुलता

यथा—

'युवा युगव्यायतबाहुरंसलः' इत्यादौ ।

मध्ये कार्श्यम्

यथा—

'अवन्तिनाथोऽयमुदग्रबाहुर्विशालवक्षास्तनुवृत्तमध्यः ।
आरोप्य चक्रभ्रममुष्णरश्मिस्त्वष्ट्रेव यन्त्रोल्लिखितो विभाति ॥'

इत्यादौ ।

उन्नतता पदे ॥ २ ॥

---

१. 'शालीनतापव्रजमस्तमानः' ख.

यथा—

'कूर्माकारं चरणयुगलं धूतदिग्दन्तिशुण्डा-
दण्डावूरू भुजयुगमपि व्यक्तनागेन्द्रशोभम्।
प्रायः पृथ्वीधरणविधये तत्समर्थान्पदार्था-
नेकीकृत्य त्रिभुवनसृजा निर्मिता यस्य मूर्तिः॥'

स्तनयोरिव नारीणामत्यन्तस्वच्छता हृदि।

यथा—

'सा निर्मले तस्य मधूकमाला हृदि स्थिता च प्रतिबिम्बिता च।
कियत्यमग्ना कियती च मग्ना पञ्चेषुबाणालिरिव व्यलोकि॥'

नारीस्तनस्वच्छता यथा—

'प्रतिफलितं गलगरलं कज्जलबुद्ध्या पयोधरे देव्याः।
प्रातः प्रोञ्छितुमिच्छुर्गिरिजाहसितो हरो जयति॥'

कान्तिप्रयोजकं यावत्तावत्तद्वत्प्रवर्ण्यते॥ ३॥

तद्वद्योषिद्वत्। यथा—

'कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी॥'[1]

'धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिव॥'

'चन्द्राननचन्द्रदिनं मृगलोचनमृगशिरश्च नक्षत्रम्।
तिथिरतिथिप्रियं[2] नवमीशुभयोगः स्वर्भग भाति भवान्॥'

'कामं कमलपत्राणां नेत्रे तस्यानुकारिणी।'

इत्यादि। विस्तृतमन्यत्र। इदमुपलक्षणम्। आह्लादकत्वपुरस्कारेण[3] चन्द्रादिसाम्यमुभयोरपि।

---

१. इदमुत्तरार्धं क-ग-पुस्तकयोर्नास्ति. २. इदमर्धं क-ग-पुस्तकयोर्नास्ति.
३. 'साम्येन' ग.

यथा—

'इत्थं द्विजेन द्विजराजकान्तिः'[1], 'इन्दुप्रभामिन्दुमतीमवेत्य'[2], 'स्फुरत्कमलप्रभे' इति श्रुतबोधे।

प्रतापोऽर्काग्निवज्राद्यैः[3] कीर्तिश्चन्द्रादिशुभ्रकैः।
करे पद्मोर्ध्वरेखादि पदे छत्रध्वजादिकम्।
गमनं हस्तिसिंहाभ्यां कार्कश्यं च भुजादिषु॥ ४॥

स्फुटमिहोदाहरणम्। गमनमिति।

यथा—

'पूर्वं यथा देवपतेर्नियोगं[4] मूर्ध्ना वहन्कार्मुकबाणहस्तः।
प्राप्तस्तथैवाशु गजेन्द्रगामी प्रोद्भिद्यमानो नवयौवनेन॥'

'ततो मृगेन्द्रस्य मृगेन्द्रगामी' इत्यादौ।

स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः [5]पुंसि श्रेष्ठार्थवाचकाः॥ ५॥

अत्रादिपदादृषभोऽपि।

कर्तव्या रत्नसिंहाद्या नरराजादितः पदात्।
विशेष्यभावो द्युसदां वरभूमिविशेषणात्॥
यद्यत्सामुद्रिकाद्युक्तं तद्वर्ण्यमुभयोरपि।
किंतु शिष्टप्रयोगोऽत्र नियामकतयेष्यते॥

इत्यलंकारशेखरे वर्णकरत्ने पुरुषवर्णनमरीचिः॥ १४॥

पञ्चदशो मरीचिः।

इदानीं सादृश्यप्रापकप्रकारमाह—

इवाद्यैः प्रतिमानाद्यैः समानाद्यैर्निभादिभिः।
बन्धुचौरारिवंशाद्यैः सादृश्यप्रतिपत्तयः॥ १॥

---

१. 'इति' क-ग. २. 'तीं बभाषे' ग.' ३. 'भ्यादि' ग. ४. 'पतिर्नि' ख. ५. 'पुंसः' ग. 'हंस' क.

इवाद्यैरिति । तदाहुः—

इववद्वायथाशब्दाः समाननिभसंनिभाः ।
तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः ।
सदृक्सदृशसंवादिशब्दाः सादृश्यवाचकाः ॥ २ ॥

प्रतिमानाद्यैरिति ।

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् ॥

समानाद्यैर्निभादिभिरिति ।

वाच्यलिङ्गाः समानश्च सदृक्षः सदृशः सदृक् ।
साधारणः समस्तुल्यः स्युरुत्तरपदे त्वमी ।
निभसंकाशनीकाशप्रतीकाशोपमादयः ॥

बन्धिवति ।

बन्धुर्मित्रं वयस्यश्च प्रेयान्प्रीतः सुहृत्सखा ।

उपमानोपमेययोरेवम् । चौरेति ।

चौरैकागारिकस्तेनदस्युतस्करमोषकाः ।
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ॥

मुखकान्तिचौरश्चन्द्र इत्यादि कर्तव्यम् । अरीति ।

रिपुवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ।
द्विड्विपक्षाहितामित्रदस्युशात्रवशात्रवः ।
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥

चन्द्रस्य वैरि मुखमित्यादि कर्तव्यम् । वंशाद्यैरिति ।

संततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः संतानः सपिण्डास्तु सनाभयः ॥
समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।
सगोत्रबान्धवज्ञातिबन्धुश्च स्वजनः समाः ॥

चन्द्रसगोत्रं चन्द्रसोदरं मुखमित्यादि कर्तव्यम् ।

प्रकारान्तरमाह—

भृतकाद्यैर्भृत्याद्यैर्न्यक्कारार्थक्रियापदैः।
संदेहतत्तद्वाक्याद्यैः सादृश्यं प्रतिपद्यते ॥ ३ ॥

भृतकाद्यैरिति।

भृतको भृतिभुक्कर्मकरो वैतनिकश्च सः।

'मुखस्य भृतकश्चन्द्रः' इत्यादि कर्तव्यम्। भृत्याद्यैरिति।

भृत्यदासेयदासेरदासगोप्यकचेटकाः।
नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारकाः ॥

मुखस्य दासः शशीत्यादि कर्तव्यम्। न्यक्कारार्थेति।

न्यक्करोति तिरस्कुर्वन्प्रतिक्षिपति भर्त्सति।
आक्रोशत्यवजानाति कदर्थयति निन्दति।
विडम्बयति संरुन्धे हसतीर्ष्यत्यसूयति ॥

त्वन्मुखबिम्बश्चन्द्रं न्यक्करोति, इत्यादि विधेयम्।

तृणीकृतमधिक्षिप्तं निरस्तं च लघूकृतम्।
अनादृतमवज्ञातमम्भोजं त्वन्मुखेन्दुना ॥

संदेहेति—'किमिन्दुः किं पद्मम्' इत्यादि। तत्तद्वाक्येति। यथा—

तस्य पुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति।
तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति ॥
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते।
तमर्थमनुबध्नाति तच्छीलं तन्निषेधति ॥
तस्य चानुकरोतीति तमर्थमनुधावति।
आकारयत्याह्वयते जिगीषति सरोरुहम् ॥
विधिरम्भोजसाम्राज्ये मुखेन्दुमभिषिञ्चति।
तस्या मुखेन सदृशं कः कर्तुं चन्द्रमीश्वरः।
भवतीन्दुर्न दासोऽपि त्वदास्यं चेत्किमिन्दुना ॥

चन्द्रमूर्ध्नि पदं धत्ते वृथा चन्द्र तपस्यति ।
लीयते चन्द्रमाः क्वापि बिभेति च पलायते ॥

दण्डी तु—

प्रतिच्छन्दसरूपादिसजातीयानुवादिनः ।
सलक्षणसपक्षाभसवर्णतुलितादिकम् ॥
कल्पदेशीयदेश्यादि ये चान्यूनार्थवादिनः ।
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
भवन्तीवादिशब्दाश्च सादृश्यप्रतिपत्तये ॥

इत्याहुः ।

कवीनां घटनान्यैव चराचरविलक्षणा ।
अकर्तुमन्यथा कर्तुं कर्तुं या क्षमते जगत् ॥

इति केशवमिश्रकृतेऽलंकारशेखरे वर्णकरत्नम् ।

इदानीं कविसंप्रदायस्य सर्वापेक्षयाभ्यर्हितत्वं दर्शयन्नाह—

असतोऽपि निबन्धेन सतामप्यनिबन्धनात् ।
नियमस्य पुरस्कारात्संप्रदायस्त्रिधा कवेः ॥ १ ॥

असतोऽपीति । वस्तुगत्या यन्न भवति तदपि कविभिर्निबध्यते ।

यथा—

रत्नानि यत्र तत्राद्रौ हंसाद्यल्पजलाशये ।
जलेभाद्यं नभोनद्यामम्भोजाद्यं नदीष्वपि[1] ॥
तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता ।
शुक्लत्वं कीर्तिपुण्यादौ कार्ष्ण्यं चाकीर्त्यघादिषु ॥
प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः ।
ज्योत्स्नायानं चकोराणां सेवालं सर्ववारिषु ॥
केसराशोकयोः सत्स्त्रीगण्डूषात्पादघाततः ।
मासान्तरेऽपि पुष्पाणि रोमालिस्त्रिवलिस्त्रियाम् ॥

सतामपीति । पारमार्थिकमपि न निबध्यते ।

---

१. 'नदेष्वपि' ग.

यथा—

वसन्ते मालतीपुष्पं फलपुष्पे च चन्दने ।
कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता ।
नारीणां श्यामता पातः स्तनयोर्यच्च वा ह्रिये[1] ॥

नियमस्येति ।

हिमवत्येव भूर्जत्वक् चन्दनं मलये परम् ।
हेमन्तशिशिरौ त्यक्त्वा सर्वदा कमलस्थितिः ॥
सामान्यग्रहणे शौक्ल्यं पुष्पाम्भश्छत्रवाससाम् ।
ध्वजचामरहंसानां हारस्य बकभस्मनोः ॥
कृष्णत्वं शैलवृक्षादि मेघवारिधिवीरुधाम्[2] ।
भिल्लका चासुराणां च धूपपङ्कशिरोरुहाम् ॥
लौहित्यं धातुमाणिक्यजपारत्नविवस्वताम् ।
पद्मपल्लवबन्धूकदाडिमीकरजादिषु ॥
पीतत्वं शालिमण्डूकवल्कलेषु परागके ।
वर्षास्वेव शिखिप्रौढिर्मधावेव पिकध्वनिः ॥

अन्यच्च—

कमला संपदोः कृष्णहरितोर्नागसर्पयोः ।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ॥
चन्द्रे शशैणयोः कामध्वजे मकरमत्स्ययोः ।
दानवासुरदैत्यानामैक्यमेवाभिसंहितम् ॥

अपि च ।

चिरंतनस्यापि तथा शिवचन्द्रस्य बालता ।
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥
भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश ।
चतस्रोऽष्टौ दश दिशश्चतुरः सप्त चाम्बुधीन् ॥

---

१. 'नम्रता तथा' ग. २. 'नीरधि' ख.

अष्टादश स्मृता विद्याश्चतस्रश्च चतुर्दश।
ये स्थले ते जले जीवा भिन्दन्त्यर्कं रणे मृताः॥
महत्त्वमादौ सर्गान्ते सूक्ष्मता जगतामपि।
शैलादिर्भिद्यते शब्दा[1]न्नभः शतधनूपरि॥
नाम तत्तदुपाधौ स्याच्छंकरो वृषवाहनः।
चि[2]ह्नत्वे च वृषाङ्कोऽयं ध्वजे सत्त्वाद्वृषध्वजः॥
शूली, न सर्पी गिरिशः; शशी, न हरिणी विधुः;।
इन्दुमौलिर्महादेवो गङ्गामौलिर्न तु क्वचित्॥
रलयोर्डलयोश्चैव बवयोः शसयोर्न भित्।
नानुस्वारविसर्गौ च चित्रभङ्गाय संमतौ॥
इववद्वाहिहीहस्मबतवैतुकिलैवच।
पदान्येतानि देयानि पादस्याद्ये न जातुचित्॥
भूतेन्द्रभारतेशात्प्राग्महच्छब्दो निरर्थकः।
दुरर्थो ब्राह्मणे वृष्टिभोज्यौषधपथादिषु॥

इत्यलंकारशेखरे कविसंप्रदायरत्ने नियममरीचिः॥ १५॥

षोडशो मरीचिः।

इदानीं संक्षेपेण वर्णनीयान्याह—

[3]वर्ण्यश्च राजा देवी च देशो ग्रामः पुरी सरित्।
सरोऽब्ध्यरण्योद्यानाद्रिप्रयाणरणवाजिनः॥
हस्त्यर्कचन्द्रावृतवो विवाहोऽथ स्वयंवरः।
सुरा पुष्पाम्बुसंभोगः विश्लेषमृगयाश्रमाः।
[4]काला ऋतुवयःसंधी धातुवृक्षाभिसारिकाः॥

[5]एतेषां विशिष्य वर्णप्रकाराः [6]प्रदृश्यन्ते—

नृपे कीर्तिप्रतापाज्ञादुष्टशान्तिविवेकिताः।
धर्मप्रयाणसंग्रामशस्त्राभ्यासनयक्षमाः॥

---

१. 'नभःपूर्तिरथोद्गमम्' ग. २. 'चिह्नत्वेन' ख-ग. ३. 'वर्ण्याश्च' क-ख. ४. 'कालान्तरं' ग. ५. 'एषां विशेषवर्णनमाह' ग. ६. 'प्रदर्श्यन्ते' ख.

प्रजापालो[1]ऽरिशैलादिवासोरिपुरशून्यता ।
औदार्यधैर्यगाम्भीर्यशौर्यैश्वर्योद्यमादयः ॥
देव्यां सौभाग्यलावण्यशीलशृङ्गारमन्मथाः ।
त्रपाचातुर्यदाक्षिण्यप्रेममानव्रतादयः ॥
देशे बहुखनिद्रव्यपशुधान्य[2]करोद्भवाः ।
दुर्गग्रामजनाधिक्यनदीमातृकतादयः ॥
ग्रामे धान्यलतावृक्षसरसीपशुपुष्टयः ।
क्षेत्रादिहट्ट[3]केदारग्रामेयी[4]मुग्धविभ्रमाः ॥
पुरेऽट्टपरिखावप्रप्रतोलीतोरणध्वजाः ।
प्रासादाध्वप्रपारामा वापी वेश्या सती[5] नदी ॥
सरित्यम्बुधियायित्वं वीच्यो वनगजादयः ।
पद्मानि षट्पदा हंसनक्राद्याः कूलशाखिनः ॥
सरस्यम्भोलहर्यम्भो गजाद्यम्बुजषट्पदाः ।
हंसनक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः ॥
अब्धौ द्वीपाद्रिरत्नोर्मिपोतयादोजलप्लवाः ।
विष्णुकुल्यागमश्चन्द्राद्वृद्धिरौर्वोऽब्दपूरणम् ॥
अरण्ये हि वराहेभयूथसिंहादयो द्रुमाः ।
काकोलूककपोताद्या भिल्लभल्लूदवादयः ॥
उद्याने सरणिः[6] सर्वफलपुष्पलतादयः ।
पिकालिकेलिहंसाद्याः क्रीडा चाप्यध्वगस्थितिः ॥
शैले महौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्ग[7]पादगुहारत्नवनजीवाद्युपत्यकाः ॥
प्रयाणे भेरिनिःस्वानभूकम्पबलधूलयः ।
करभो[8]क्षगजच्छत्रवणिक्शकटवेसराः ॥

---

१. 'पालारि' ग. २. 'धान्याकरो' ख-ग. ३. 'रुद्र' ख. ४. 'ग्रामस्त्री' ग, 'ग्रामीणा' ख. ५. 'मही' ख. ६. 'सारणिः' ख. ७. 'भृगुपात' ख. ८. 'परक्षोभ' ख.

युद्धे तु वर्म[1]बलचा[2]ररजांसि तूर्य-
निर्घातनादशरमण्डपरक्तनद्यः।
छिन्नातपत्ररथचामरकेतुकुम्भि-
योधाः सुरीवृतभटाः सुरपुष्पवृष्टिः॥
अश्वे वेगित्वमौन्नत्यं तेजः सल्लक्षणं स्थितिः।
खुरोत्खातरजःप्रौढिर्ज्ञातिर्गतिविचित्रता॥
गजे सहस्रयोधित्वमुच्चता कर्णचापलम्।
अरिव्यूहविभेदित्वं कुम्भयुक्तामदालयः॥
सूर्येऽरुणता रविमणिचक्राम्बुजपथिकलोचनप्रीतिः।
तारेन्दुदीपकौषधिघूकतमश्चौरकुलटार्तिः॥
चन्द्रे कुलटाचक्राम्बुजचौरैर्विरहितमोर्तिरौज्वल्यम्।
जलधिजलनेत्रकैरवचकोरचन्द्राश्मदम्पतिप्रीतिः॥
सुरभौ दोलाकोकिलदक्षिणवातद्रुपल्लवोद्भेदाः।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझाङ्काराः॥
ग्रीष्मे पाटलमल्लीतापसरःपथिकशोषवातोल्काः।
सक्तुप्रपाप्रपास्त्रीमृगतृष्णाम्रादिफलपाकाः॥
वर्षासु घनशिखिस्मयहंसगमाः पङ्ककन्दलोद्भेदौ।
जातीकदम्बकेतकझञ्झानिलनिम्नगाहलिप्रीतिः॥
शरदीन्दुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः।
सप्तच्छ[3]दासिताभ्राब्जरुचिः शिखिपक्षमदपाताः॥
हेमन्ते दिनलघुता मरुबकयववृद्धिशीतसंपत्तिः।
शिशिरे कुन्दसमृद्धिः कमलहतिर्वा गुडामोदः॥
विवाहे स्नानशुद्धाङ्गभूषातूर्यत्रयीरवाः।
वेदीसंगीतहोमादिलाजमङ्गलवर्तनम्॥
स्वयंवरे शचीरक्षा मञ्चमण्डपसज्जनाः।
राजपुत्री नृपाकारान्वयचेष्टाप्रकाशनम्॥

---

१. 'चर्म' ख. २. 'मीन' क, 'वन' ग. ३. 'छदस्मितार्का' ख.

सुरापाने विकलता स्खलनं वचने गतौ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्ताक्षता भ्रमः॥
पुष्पावचये पुष्पावचयः पुष्पार्पणार्थने दयिते।
मालागोत्रस्खलने क्रोधो वक्रोक्तिसंभ्रमाश्लेषाः॥
जलकेलौ सरः[1]क्षोभश्चक्रहंसापसर्पणम्।
पद्मज्यानिः पयःक्षेपो दृग्रागो भूषणच्युतिः॥
सुरते सात्त्विका भावाः शीत्कारः कुङ्मलाक्षता।
काञ्चीकङ्कणमञ्जीररवोऽधरनखक्षते॥
विरहे तापनिःश्वासचिन्तामौनकृशाङ्गताः।
अब्दसंख्या निशादैर्घ्यं जागरः शिशिरोष्णता॥
मृगयायां च संचारो वागुरानीलवेषता।
मृगाधिक्यं मृगत्रासो हिंस्रद्रोहो गतित्वरा॥
आश्रमेऽतिथिपूजैणविश्वासो हिंस्रशान्तता।
यज्ञधूमो मुनिसुता द्रुसेको वल्कलं द्रुमाः॥
पद्मकेकोत्सवः प्रातर्मध्याह्ने तापसंप्लवः।
सायं सूर्यातिलौहित्यं चक्रपद्मादिविप्लवः॥
पूर्वत्वग्रेतनत्वोश्च संधिं व्याप्योपवर्णनम्।
एवं शैशवतारुण्यमाध्यस्थ्यं विषमं च तत्॥
अन्धकारेऽतिकाठिन्यं विश्वलोपसमर्थता।
आकस्मिकसमारम्भो निःशङ्कमभिसारिकाः॥
वृक्षे प्रचुरशाखात्वं दलादर्शितसूर्यता।
उच्चता प्रसवोत्कर्षो वयःपथिकसेव्यता॥
अभिसारे भयभ्रंशो मञ्जीरादितिरस्क्रिया।
साहसं रागितोत्कर्षः कालानुगुणवस्त्रता॥

इत्यलंकारशेखरे कविसंप्रदायरत्ने वर्णनीयमरीचिः॥ १६॥

---

१. 'मद' ख.

सप्तदशो मरीचिः ।

इदानीं नियमान्तरमाह—

श्वेताश्चन्द्रादयो ज्ञेया नीलाः श्रीकेशवादयः ।
शोणास्तु क्षात्रधर्माद्याः पीता दीपशिखादयः ।
धूसरा [1]रथधूल्याद्या ज्ञातव्याः काव्यवर्त्मनि ॥

अत्रैवं ज्ञातव्यम्—

श्वेतानि(?)चन्द्राशक्राश्वशंभुनारदभार्गवाः ।
हली शेषाहिशक्रेभौ सिंहसौधशरद्धनाः ॥
सूर्येन्दुकान्तनिर्मोकमन्दारद्रुहिमाद्रयः ।
हिमहासमृणालानि [2]स्वर्गङ्गेभरदाभ्रकम् ।
शिकतामृतलोध्राणि गुणकैरवशर्कराः ॥
'नीलानि कृष्णचन्द्राङ्कव्यासरामधनंजयाः ।
शनिद्रुपदजा काली राजपट्टविदूरजम् ॥
विषाकाशकुहू[3]शङ्खागुरुपापतमोनिशाः ।
रसावद्भुतशृङ्गारौ मद[4]र्तापिच्छराहवः ॥
सीरिचीरं यमो रक्षः कण्ठः खञ्जनकेकिनोः ।
कृत्या छाया गजाङ्गारखलान्तःकरणादयः ॥'
'शोणानि क्षात्रधर्मश्च त्रेता रौद्ररसस्तथा ।
चकोरकोकिलापारावतनेत्रं कपेर्मुखम् ॥
तेजः सारसमस्तं च भौमकुङ्कुमतक्षकाः ।
जिह्वेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः ॥'
पीतानि [5]दीपजीवेन्द्रगरुडेश्वरहृग्जटाः ।
ब्रह्मावीररसस्वर्णकपिद्वापररोचनाः ।
किञ्जल्कचक्रवाक्याद्या हरितालमनःशिलाः ॥
धूसराणि रजो लूता करभो गृहगोधिका ।
कपोतमूषकौ दुर्गाकाककण्ठखरादयः ॥

---

१. 'अथ' ग; 'लिकपोताद्याः' क. २. 'स्वर्दण्डेभर' क-ग. ३. 'शङ्खी' क; 'शस्त्या' ख. ४. 'तापिञ्छ' ख. ५. 'नीप' ख.

इदमुपलक्षणम्।

हरिताः सूर्यतुरगा बुधो मरकतादयः।

इत्यपि बोध्यम्।

द्वैरूप्ये चाप्रसिद्धौ च नियमोऽयमुदाहृतः।
अन्यद्वस्तु यथा यत्स्यात्तत्तथैवोपवर्ण्यते॥

इत्यलंकारशेखरे कविसंप्रदायरत्ने शुक्लादिनियममरीचिः॥ १७॥

अष्टादशो मरीचिः।

इदानीं नियमान्तरमाह—

एकस्मादासहस्रं च यद्यद्वस्तु यथा भवेत्।
तत्तत्कविप्रयोगेण ज्ञातव्यं काव्यमिच्छता॥ १॥

अत्रैवं ज्ञातव्यम्—

एक ऐन्द्रः करी चाश्वो गजास्यरदशुक्रदृक्।
द्वयं पक्षनदीकूलनरश्रुतिभुजादिकम्॥
त्रयं कालाग्निभुवनगङ्गामार्गेशदृग्गुणाः।
ग्रीवारेखा महीकोणस्तथा शूलशिखावली॥
संध्या पुरः पुष्कराणि रामविष्णुज्वराङ्घ्रयः।
चत्वारि वेदब्रह्मास्यवर्णाब्धिहरिबाहवः॥
स्वर्दन्तिदन्तसेनाङ्गोपाययामयुगाश्रमाः।
पञ्च पाण्डवरुद्रास्येन्द्रियस्वर्द्रुव्रताग्नयः॥
महाभूतमहापापमहाकाव्यमहामखाः।
पुराणलक्षणप्राणानिलवर्गेन्द्रियार्थकाः॥
षड् वज्रकोणत्रिशिरोनेत्रतर्काङ्गदर्शनम्।
चक्रवर्तिमहासेनवदनानि गुणा रसाः॥
सप्त पातालभुवनमुनिद्वीपार्कवाजिनः।
वाराश्च स्वरराज्याङ्गव्रीहिवह्निशिखादयः॥
अष्टौ योगाङ्गवस्वीशमूर्तिदिग्गजसिद्धयः।
ब्रह्मश्रुतिव्याकरणदिक्पाला हि कुलाद्रयः॥

नवाङ्गद्वारभूखण्डकृत्तरावणमस्तकाः।
व्याघ्रीस्तनसुधाखण्डशेवध्यङ्करसग्रहाः॥
दश हस्ताङ्गुलीशंभुबाहुरावणमौलयः।
कृष्णावतारदिग्विश्वेदेवावस्थेन्दुवाजिनः॥
एकादश महारुद्राः सेनाश्च कुरुभूपतेः।
द्वादशार्का राशिमाससंक्रान्तिगुहबाहवः॥
सारिकोष्ठकसेनानीनेत्रक्ष्मापतिमण्डलाः।
त्रयोदश स्युस्ताम्बूलगुणा अथ चतुर्दश॥
विद्यान्वयमनुस्वाराद्भुवनध्रुवतारकाः।
तिथयः स्युः पञ्चदश षोडशेन्दुकलाम्बिकाः॥
अष्टादश द्वीपविद्यापुराणस्मृतिधान्यकम्।
विंशती रावणभुजाङ्गुल्योऽथ शतं यथा॥
धार्तराष्ट्राः शतभिषक् तारकाः पुरुषायुषम्।
रावणाङ्गुल्यब्जदलशक्रयज्ञाब्धियोजनम्॥
सहस्रं जाह्नवीवक्त्रशेषशीर्षाम्बुजच्छदाः।
रविबाणार्जुनकरवेदशाखेन्द्रदृष्टयः॥
उदाहरणमेतेषां प्रसिद्धत्वान्न लिख्यते।
प्रहते केवलं पान्था मादृशाः काव्यवर्त्मनि॥

इति संख्यानियममरीचिः।

इति केशवमिश्रविरचितेऽलंकारशेखरे कविसंप्रदायरत्नम्॥

इदानीं प्रकारमुद्दिशन्नेव कवीनां प्रकर्षबीजमाह—

**गतागतसमत्वं च संस्कृतप्राकृतैक्यताम्।
तथा वचनयोः साम्यं धर्मिधर्माभिधायि च॥ १॥
कुर्वन्ति कवयः शक्ताः समस्यापूरणादिकम्।
आद्यं चतुष्टयं तत्र चित्रकाव्योपकारकम्॥ २॥**

१. 'मुपदिशन्नेव' ख-ग.

तंत्र **गतागतेत्यादि** । यथा[1]—

'मम रुरु मध्यम सहास कारिका-
वररव वनदानव सरसीरस गजभुजग ।
तरुणीरुत रदसोदर नदभेदन
वरभैरव कलपुलक पतदातप ॥'

इत्यादि ॥

चकारादसाम्येऽपि स्फुटार्थता यथा—

'जरा नदी मालिका राजते दीनरक्षी पिनाकिना नन्दनवन सहसात्वत'
इत्यादि ।

'रेजिरे बभूव तिष्ठति' इत्याख्याते ।

संस्कृतेत्यादि । यथा—

तत्र पुल्लिङ्गे—

'हाराहारविहारसारसमराः संभोगरोगाम्बराः
संहारामरवारवारणरणाष्टांकारतीराकराः[2] ।
लोलोल्लासविलासवायसहराहंकारहीराङ्कुरा
नीहारोरगताररागतरला गोविन्दकन्दोदराः ॥'

स्त्रीलिङ्गे—

'धरणी धारगी गोणी रोहिणी रमणी मणी ।
कन्दरी लहरी रामा नारी भेरी वसुंधरा ॥'

नपुंसके—

'जलपलफलमूलं वारिकीलालतूलं
वनपललदुकूलं तुङ्गगम्भीरकूलम्[3] ।
सलिलकमलचीरं खण्डराजीवनीरं
हलरजतकुटीरं दारुनालं पटीरम् ॥'

---

१. 'तद्यथा-' ग. २. 'ष्टंकार' क-ख. ३. 'तुण्ड' ख

(आख्याते—)

'भण गच्छ देहि संहर कुरु रोचय मारयावगच्छैहि ।
अवलोकयावचिन्तय[1] खादेति च धातुजं विद्धि ॥'

एकस्मिन्नेवार्थे बहुवचनैकवचनयोः साम्यं यथा—

क्रव्यादो देवरो वारि फलिनो बर्हिणो नरः ।
तादृशाद्या भूरुहाद्या मासफेरवसोमपाः ।
एवं रथिनमन्थानशब्दाः खुरणसादयः ॥

धर्मिधर्माभिधायि पदं यथा—

सुषिरार्द्रप्रतीहारचुल्लिपिल्लादिशात्रवाः ।
सेरालसौ मत्सरश्च धर्मिधर्माभिधायकाः[2] ॥

चकाराद्विशेषसामान्यवाचकभावाभाववाचकपरिग्रहः ।

शकुन्तधातुमरुतो गरुत्मत्कामदर्शनम् ।
अक्षं वधूश्च गमनचेटकाद्या द्विवाचकाः ।
अपिधानाद्यपूपादिभावाभावप्रदर्शकम् ॥

आदिपदात् आनादयुतसिद्धावलग्नावतंसादिपरिग्रहः[3] ।

इत्यलंकारशेखरे कविसामर्थ्यरत्ने चित्राद्युपकारमरीचिः ॥ १८ ॥

ऊनविंशो मरीचिः ।

समस्या पूरणादिकमिति । इदं तु कठिनसमस्याभिप्रायेण । तदुक्तम्—'कवयः शक्ताः' इति । तत्रैवं प्रकारः—

यदीदं स्यात्तदेदं स्यात्कावा[4] स्याद्विषमेति च ।
अयोग्यः खलु कः शब्दः कुत्र संसर्गधीर्न हि ॥ १ ॥
प्रश्नोत्तरात्पदे भङ्गात्पूर्वस्मिन्नाद्ययोजनात् ।
मिथ्याभिधाय्यसावेवमेष सार्वत्रिकः क्रमः ॥ २ ॥

---

१. 'चिन्त खादेत धा०' क; 'चिन्तय धारय खादयेति धा०' ग. २. 'धर्मधर्म्यभि' क. ३. 'आरात्–अयुत–भिन्न–प्र' क-ग. ४. 'कर्ता विषयमेति' ग.

प्रश्नेति । 'हारामहादेवरतातमातः' इत्यत्र—

'के मण्डयन्ति स्तनमण्डलानि कीदृश्युमा चन्द्रमसः कुतः श्रीः ।
किमाह सीता दशवक्रनीता हारामहादेवरतातमातः ॥'

इतिवत् । पद इति । मृगात्सिंहः पलायत इत्यादौ । मृगमत्ति मृगात् ते पलाय मांसाय इत्यर्थकरणादित्यर्थः । पूर्वस्मिन्निति । 'प्रत्यर्थिकीर्तिनिर्जितकज्जलधवलं [1]जपाकुसुमम्' इति[2]वत् ॥ यथायथम[3]वान्तरप्रकारस्तु—

'एतत्स्वप्ने मया दृष्टं चि[4]त्रैन्यस्तं विलोक्यताम् ।
अरिष्टमेतत्संजातमिन्द्रजालं विभावय ॥'

प्रबोधयति बालांश्च यथायोग्यं प्रपूरयेत् ।

सुबोधमिदम् । [5]प्रकारान्तरं तु—

देवर्षिवरशापाद्यैर्मणिमन्त्रौषधादिभिः ॥ ३ ॥
मनोरथेन तपसा पापात्पुण्यचयेन च ।
मायया शम्बरादीनां सर्वं संभावयेत्कविः ॥ ४ ॥

[6]अत्रादौ द्वन्द्वद्वयम् । तपस्तात्कालिकं पुण्यम् । श्रीपादस्तु—

'रागवात्सल्यशोकाद्यैर्वियोगेन मदेन च ।
मतिभ्रमेण शौर्येण विपरीतकरः पुमान् ॥'

इत्याह ॥ असाधारण्येन[7] तत्प्रकारस्तु—

कल्पाद्यब्ध्यणुसंसर्गप्रतिचक्षुष्यणुर्महान् ।
युगान्[8]तातिमिदूरोच्चनिकटे महदप्यणु ॥ ५ ॥
हरेरधोमुखत्वेन बिम्बाच्च विपरीतता ।
दृक्पीडनात्तनुव्यूहाद्भावनाबिम्बतो बहु ॥ ६ ॥
तमोकीर्त्यादिभिः कार्ष्ण्यं शाक्ल्यं ज्योत्स्नादिकीर्तिभिः ।
लौहित्यं रक्तपित्तादिसंध्यारताधरादिभिः ॥ ७ ॥

[9]तिमिर्वृद्धताप्रयुक्तचक्षुर्मान्द्यम् । इयं च 'शैलीयति पिपीलिका' इत्यादौ,

---

१. 'यावककुसुमम्' ग. २. 'नास्ति' ख; 'यावत्' ग. ३. 'भावा' ग. ४. 'चित्रं' ग. ५. ख-पुस्तके नास्ति. ६. 'तत्र द्वन्द्व' ग. ७. 'ण्येन तत्तत्प्रका' क. ८. 'न्तमति' ख. 'न्तमिति'; घ; 'न्ते चातिदूरो' ख-ग. ९. 'तिमिरं' ख-ग.

'मशकीयति कुञ्जरः' इत्यादौ । 'विपरीतोऽभवज्जनः' इत्यादौ । 'एकोऽपि स शतं नृपः' इत्यादौ । 'मषीयति जगत्त्रयम्' इत्यादौ । 'श्वेतद्वीपायते जगत्' इत्यादौ । 'पद्मरागायते जगत्' इत्यादौ क्रमेण बोध्यम् ॥

कासांचित्समस्यानां नानाभुवनीयसंसर्गविषयत्वात्तत्प्रकाराः प्रदर्श्यन्ते—

जगतः प्रलये भूमिर्द्यौर्गरुत्मत्सुधोद्धृता ।
[1]वलीष्टौ [2]हाटकेशीययात्रायां द्वौ रसातले ॥ ८ ॥

हाटकेशः पातालशंभुः । रसातल इति [3]त्रितयान्वयि । तथा—

द्यौर्बिम्बेन जलेशाद्योर[4]ब्धिमन्थे द्वयं भुवि ।

भुवीत्युभयान्वयि ॥ तथा—

'पातालं वा नरोत्क्षिप्तचन्दनद्रुमपन्नगैः ।
ध्वजप्रासादधूलीभिर्भूमिः स्वर्गमुपाययौ ॥'

अगस्त्याम्भोधिपानादिपौराणिककथाशतैः ॥ ९ ॥
शिवादिदेवसंचारैः सादृश्यैः सर्ववर्णनम् ।
श्रीकृष्णस्योदरे सर्वसंसर्गः सार्वकालिकः ॥ १० ॥

पातालं भूमिश्च स्वर्गं ययावित्यर्थः । तथा—

शिवादीति । यत्र शिवो याति तत्र तत्रान्तरीयकतया सर्पचन्द्रानलादीनामपि गमनमावश्यकमित्यर्थः । सादृश्यैरिति । लक्षणया 'सूच्यग्रे पर्वतद्वयम्' इत्यादौ । औचित्येन—

संग्रामकुम्भिमुक्ताभिर्दिवा तारकितं नभः ।
इत्यादौ । राजशेखरस्तु—

उत्पाटितैर्नभोनीतैः शैलैरामूलबन्धनात् ।
तांस्तानर्थान्समालोक्य समस्यां पूरयेत्कविः ॥ ११ ॥

वृद्धास्तु—

कः प्रत्येति प्रतीमो न द्राक्प्रत्येति प्रतीहि च ।
न हि नो तत्किमित्याद्यैरुक्तिमाश्रित्य पूरयेत् ॥ १२ ॥

---

१. 'बलेष्टौ' ख. 'वलीन्द्रौ' ग. २. 'हाटकेशाय' क. ३. 'तृतीया' ग. ४. शार्ङ्गी त्वब्धि' ग.

यथा—

पराजितश्चेद्भगवाञ्जरासंधेन जन्तुना ।
प्रतीतिरद्य मे जाता मृगात्सिंहः पलायते ॥
मा संभावय शल्येन फाल्गुनस्य पराभवम् ।
कः प्रतीयात्कुरुश्रेष्ठ मृगात्सिंहः पलायते ॥
नहि गाण्डीवकोदण्डमृगात्सिंहः पलायते ।
तत्किं कमलपत्राक्ष मृगात्सिंहः पलायते ॥

सुबोधमखिलम् । तार्किकास्तु—

शब्दादुच्छलिते सिन्धौ शैलाण्डादौ च दारिते ।
त्वत्प्रतापाद्द्रवीभूते स्वर्णाद्यण्डादितैजसे ॥
वि[1]रहे सर्वदहनः संतोषे सर्वमेव शशी ।
कामिनि सर्वं काम्यं शान्ते लोष्ठायते विश्वम् ॥
वैशेषिकेषु काव्येषु गणेषूत्कृष्टमन्दयोः ।
अनपेक्षया च संसर्गे स्यातामुत्कृष्टमन्दते ॥

वैशेषिकेषु रूपरसादिषु काव्येषु शौर्यौदार्यसौन्दर्यादिषु—

शिशूनां गतयेऽस्माभिर्दिङ्मात्रमिह दर्शितम् ।
काव्यकान्तारपन्थानामीदृश्यर्थे कियान्श्रमः ॥

अपरिकलितकाव्यसरणिमीश्वरं वशीकर्तुमनतिचिरमनुवसन्कविः ।

अव्ययैरजहल्लिङ्गैः साधारणविशेषणैः ।
छन्दो ज्ञात्वा पृथग्वाक्यैः स्व[2]बुद्ध्या मानसीं श्रयेत् ॥

समस्यं पदवाक्यमिति स्मर्तव्यम् ॥

इति समस्यापूरणमरीचिः ॥ १९ ॥

इति महाराजाधिराजश्रीमन्माणिक्यचन्द्रकारितेऽलंकारशेखरे कविसामर्थ्यरत्नम् ॥

विंशो मरीचिः ।

रस आत्मेत्युक्तम् । तस्य यथा—आत्मानं विना शरीरमप्रयोजकं तथा रसं विना काव्यमित्यर्थः ॥

---

१. 'निरहे' क. २. 'संबुद्ध्यामनसि' क.

यदाह—

'साधुपाके विना स्वाद्यं भोज्यं निर्लवणं यथा।
तथैव नीरसं काव्यं स्यान्नो रसिकतुष्टये॥'

तत्र रसत्वमङ्गाङ्गीभावापन्नसकलविभावादि साक्षात्कारत्वम्। अङ्गाङ्गीत्यादि समूहालम्बनवारणाय। रसत्वमपि जातिरिति वयम्। केचित्तु—

कारणेनाथ कार्येण सहकारिभिरेव च।
व्यक्तत्वं नीयमानस्तु स्थायीभावो रसः स्मृतः॥

कारणमङ्गनानवयौवनादि।—

कार्याणि—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः॥

सहकारिण उद्यानादयः। व्यभिचारिणो ग्लान्यादयः। यदाहुः—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आरोप्यमाण उत्कर्षं स्थायीभावो रसः स्मृतः॥

तमिदानीं विभजते—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताख्याः काव्ये नव रसाः स्मृताः॥ १॥

शृङ्गारत्वहास्यत्वादिकं च जातिविशेष एव। व्यक्तिप्रश्नस्तु सुखज्ञानात्मकरसवादिमतेन भवत्येवेति दिक्।

तत्र शृङ्गारं विभजते—

संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः।

तत्र स्त्रीपुंसलक्षणेष्टप्राप्तौ रतिरेव संभोगः। तदुक्तम्—

अनुरक्तौ निषेवेतां यत्रान्योन्यं विलासिनौ।
दर्शनस्पर्शनादीनि संभोगोऽयमुदाहृतः॥

तत्र नायिकाश्रयः संभोगो यथा—

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।

विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥'

आलोक्य नम्रमुखीत्यन्वयः ।

नायिका चतुर्विधा—

अनूढा च स्वकीया च परकीया पैणाङ्गना ।
त्रिवर्गिणः स्वकीया स्यादन्याः केवलकामिनः ॥ २ ॥
अनुरक्तानुरक्तेन स्वयं या स्वीकृता भवेत् ।
सानूढेति यथा राज्ञो दुष्यन्तस्य शकुन्तला ॥ ३ ॥
देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका ।
परकीयाप्यनूढेव विशेषस्तु स्फुटस्तयोः ॥ ४ ॥
सामान्यवनिता वेश्या भवेत्कपटपण्डिता ।
न हि कश्चित्प्रियस्तस्या दातारं पुरुषं विना ॥ ५ ॥

अस्याः प्रकाशः, अन्यासां प्रच्छन्नो रमण इति विशेषः । ताश्चाष्टधा । तदुक्तम्—

खण्डितोत्कण्ठिता प्रोषितपतिका चाभिसारिका ।
कलहान्तरिता वासकसज्जा विप्रलब्धिका ।
स्वाधीनभर्तृका चान्या चतस्रोऽप्यष्टधा मताः ॥

नायकाश्रयो यथा—

'त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधातरि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥'

रूपसौभाग्यसंपन्नः कुलीनः कुशलो युवा ।
अनुद्धतः सूनृतवाङ्नायकः प्रीतये स्त्रियाम् ॥ ६ ॥
अयं बहुप्रकारोऽपि संक्षेपेण चतुर्विधः ।
अनुकूलो दक्षिणश्च शठधृष्टौ च ते यथा ॥ ७ ॥

---

१. 'पण्यङ्गना' क; 'वराङ्गना' ग; 'पराङ्गना' घ.

नीलीरागोऽनुकूलः स्यादनन्यरमणीरतः।
दक्षिणश्चान्यचित्तोऽपि यः स्यादविकृतः स्त्रियाम् ॥ ८ ॥
प्रियं वक्त्यप्रियं तस्याः कुर्वन्यो विकृतः शठः।
धृष्टो ज्ञातापराधोऽपि न विलक्षोऽवमानितः ॥ ९ ॥

विप्रलम्भस्तु—

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति।
नाधिगच्छति चाभीष्टं विप्रलम्भः स उच्यते ॥ १० ॥

इत्यनेन लक्षितः। अत्राभीष्टं स्त्रीपुंसलक्षणमेव। स च

पूर्वानुरागो मानात्मा प्रवासः करुणात्मकः।
विप्रलम्भश्चतुर्धा स्यात्पूर्वपूर्वो ह्ययं गुरुः ॥ ११ ॥

तत्र

स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः।
ज्ञेयः पूर्वानुरागोऽयमलाभादतिकामयोः ॥ १२ ॥

यथा—

'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।
यस्यान्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसा परिकल्पितास्वपि भवत्यानन्दसान्द्रोदयः ॥'

अथान्यवनितासक्तमवमत्य स्ववल्लभम्।
ईर्ष्यावशेन वैमुख्यमेष मान उदाहृतः ॥ १३ ॥

यथा—

'सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलना वक्रोक्तिसंसूचनम्।
अच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥'

प्रवासः परदेशस्थे द्वितीये विरहोद्भवः।

यथा—

'त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥'

इत्यादौ ।

स्यादेकतरपञ्चत्वे दम्पत्योरनुरक्तयोः ।
शृङ्गारः करुणाख्योऽयमजस्य हि रतेरिव ॥ १४ ॥

ननु शृङ्गारस्य रतिप्रकृतित्वात्तस्याश्च सुखसंवेदनरूपत्वात्तस्य च विप्रलम्भेऽसंभवात्स कथं शृङ्गारभेद इति चेन्न । 'धन्योऽहमस्याः कृते दशामिमामनुभवामि' इति तत्रापि तदभिमानात् । क्वचित्संभोगपोषकत्वेन स्पृहणीयत्वाच्चेति विस्तृतं मयैव काव्यरत्ने । श्रीपादस्तु—

रतिर्भवति देवादौ मुनौ पुत्रे नृपे गुरौ ।
शृङ्गारस्तु भवेत्सैव या कान्ता विषया रतिः ॥ १५ ॥

तत्र देवे यथा—

'कण्ठकोणविनिविष्टमीश ते कालकूटमपि ते महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते[1] ॥'

मुनौ यथा—

'हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥'

पुत्रे यथा—

'एह्येहि वत्स रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्ध्नि सुचिरं च परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥'

---

१. 'रोचते न मे' ख. 'येन रोचते' ग.

नृपे यथा—

'ते कोपीनधनास्त एव सुचिरं धात्रीफलं भुञ्जते
तेषां द्वारि नदन्ति वाजिनिवहास्तैरेव लब्धा स्थितिः।
तैरेतत्समलंकृतं निजकुलं किं वा बहु ब्रूमहे
ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा॥'

गुरौ यथा—

'हा तात विश्वजनवत्सल मामकीन-
जीवौषध द्युमणिवंशवतंसभूत।
स्यां चेद्भवत्कुलजसद्मनि चेटकः स्यां
यद्वा भवच्चरणपङ्कजरेणुरेव॥'

हासमूलः समाख्यातो हास्यनामा रसो बुधैः।
चेष्टाङ्गवेषवैकृत्याद्वाच्यो हासस्य चोद्भवः॥ १६॥
कपोलाक्षि कृतोल्लासो भिन्नोऽष्टः स महात्मनाम्।
विदीर्णास्यश्च मध्यानामधमानां स शब्दकः॥ १७॥

यथा—

'नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः।
तच्च तत्रैव रमते हताः पाणिनिना वयम्॥'

शोकोत्थः करुणो ज्ञेयस्तत्र भूपातरोदने।
वैवर्ण्यमोहनिर्वेदप्रलापाश्रूणि वर्णयेत्॥ १८॥

यथा—

'मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न॥'

क्रोधात्मको भवेद्रौद्रः क्रोधः प्रौढ्या च वैरिणः।
भीष्मवृत्तिरसामान्यो भवेदुग्रक्रियाश्रयः॥ १९॥
स्वांशघातः स्वशंसास्त्रोत्क्षेपभ्रुकुटयस्तथा।
अत्रारातिजनाक्षेपो दलनं चोपवर्ण्यते॥ २०॥

---

१. 'स्वयं शस्त्रो' ग.

यथा—

'कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां समं स किरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलीन् ॥'

उत्साहात्मा भवेद्वीरो बलशस्त्राश्रयश्च सः ।
नायकोऽत्र भवेत्सर्वैः श्लाघ्यैरधिगतो गुणैः ॥ २१ ॥

यथा—

'क्षुद्राः संत्रासमेते विजहित हरयो भिन्नशक्रेभकुम्भा
युष्मद्गात्रेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥'

भयानको भवेद्भीतिप्रकृतिर्घोरवस्तुनः ।
स च प्रायेण वनितानीचबालेषु दृश्यते ॥ २२ ॥
दिगालोकास्य शोषाङ्गकम्पा गद्गदसंभ्रमाः ।
स्तम्भवैवर्ण्यमोहाश्च वर्ण्यन्ते विबुधैरिह ॥ २३ ॥

यथा—

'ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥'

बीभत्सः स्याज्जुगुप्सातः सौहृद्यश्रवणेक्षणात् ।
निष्ठीवनास्यभङ्गादि स्यादत्र महतां न च ॥ २४ ॥

यथा—

'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रगन्धीनि जग्ध्वा ।

---

१. 'विजहत' ग.

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥'

विस्मयात्माद्भुतो ज्ञेयो स चासंभाव्यवस्तुनः।
दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते ॥ २५ ॥
तत्र नेत्रविकारः स्यात्पुलकः स्वेद एव वा।
निस्पन्दनेत्रता साधु साधुवादा तथा च गीः ॥ २६ ॥

यथा—

'चित्रं कनकलतायां शरदिन्दुस्तत्र खञ्जनद्वितयम्।
तत्र च मनोजधनुषी तदुपरि गाढान्धकाराणि ॥'

सम्यग्ज्ञानसमुत्थानः शान्तो निःस्पृहनायकः।
रागद्वेषपरित्यागे सम्यग्ज्ञानस्य चोद्भवः ॥ २७ ॥
पश्चात्तापः शरीरादि यावद्वस्तुविडम्बनम्।
विवेकचित्तस्थैर्यादि योगाद्यास्तस्य लक्षणम् ॥ २८ ॥

यथा—

'अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥'

स्त्रैणं स्त्रीसमूहः। अत्र अहिरिव हारो हेयो, न तु हारवदहिरप्युपादेय इति बोद्धव्यम्। इह सर्वत्र तत्तद्रसत्वमात्र उदाहरणमिति स्मर्तव्यम्।

इदानीं रसानामविरोधविरोधावाह—

शृङ्गारहास्यौ करुणबीभत्सौ वीररौद्रकौ।
भयानकाद्भुतौ मित्रे मिथः शान्तो न कस्यचित् ॥ २९ ॥
शान्ते करुणबीभत्सौ न कश्चिद्द्वेष्टि चाद्भुतः।
शृङ्गारशान्तकरुणौ हासस्य करुणो रिपुः ॥ ३० ॥

---

१. 'साधुवादस्तथा मतः' ग. 'साधुवादास्तथा मताः' घ.

अत्र करुणबीभत्सयोर्मैत्री विशेषाभिप्रायेणेति स्मर्तव्यम् ॥

स्थायीभावो रस इत्युक्तमतस्तानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयो भावा निर्वेदः स्थायिनो नव ॥ ३१ ॥

स्थायिनो भावा नवेत्यन्वयः । ननु निर्वेदस्य कथं शान्तरसस्थायिता व्यभिचारित्वादिति चेत्, न । अधिकरणभेदेनोभयाविरोधादित्यन्यत्र विस्तरः । स्थायिलक्षणं तु

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान्स्थायीभावः स उच्यते ॥ ३२ ॥

विरुद्धैर्जुगुप्सादिभिरविरुद्धै रत्यादिभिर्यो न विच्छिद्यते । विशेषलक्षणं तु—'मनोऽनुकूलविषयं सुखात्मकसंवेदनं **रतिः** । अङ्गक्रीडादिभिश्चेतोविकारो **हासः** । इष्टनाशादिजनितचित्तवैक्लव्यं **शोकः** । प्रतिकूलतैक्ष्ण्यस्य प्ररोहः **क्रोधः** । कार्यारम्भे संरम्भः स्थिर **उत्साहः** । व्याघ्रादिदर्शनादिजनितचित्तवैक्लव्यं **भयम्** । दोषदर्शनात्पदार्थेषु गर्हणं **जुगुप्सा** । लोकसीमातिक्रान्तपदार्थविषयश्चित्तविकारी **विस्मयः** । तत्त्वज्ञानादीर्ष्यादिभिः स्वावमाननं **निर्वेदः** । एते च सर्वभावेषु मुख्याः । यदाह—

यथा नराणां नृपतिः शिष्याणां च यथा गुरुः ।
तथा सर्वेषु भावेषु स्थायीभावः स्मृतो महान् ॥

विभावो द्विविधः—'उद्दीपन आलम्बनश्च । तत्र कोकिलवसन्तादिरुद्दीपनः । नायिकादिरालम्बनः । योगात् । अस्माकं मते रतित्वादिकमनुभावत्वादिकं च जातिरेव । नहि वैशेषिकादिवदस्मत्प्रक्रियेति । अनुभावलक्षणं तु—

अनुभावो विकारस्तु भावसंसूचनात्मकः ।

तत्र—

हेलाविच्छित्तिबिब्बोककिलकिञ्चितविभ्रमाः ।
लीला विलासो हावश्च विक्षेपो विकृतं मदः ॥ ३३ ॥

---

१. 'विषयाभिप्रायेण स्मर्तव्या' ख. 'विशेषाभिप्रायेण स्मर्तव्यम्' ग.

मोट्टायितं कुट्टिमितं मौग्ध्यं च तपनं तथा।
ललितं चेत्यमी हावाश्चेष्टाः शृङ्गारभावजाः ॥ ३४ ॥

एतच्चास्माभिः प्रपञ्चितमन्यत्र। सात्त्विकलक्षणं तु—

रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते।
निर्वृत्तयेऽस्य तत्त्यागात्प्रभवन्तीति सात्त्विकाः ॥ ३५ ॥

अस्य रसस्य। व्यभिचारिलक्षणं तु—

विशेषेणाभितः काये स्थायिनं भावयन्ति ये।
अनुभावादिहेतूंस्तान्वदन्ति व्यभिचारिणः ॥ ३६ ॥

आदिपदात्स्वेदादिपरिग्रहः। ते च—

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ ३७ ॥
व्रीडा चपलता हर्ष आवेशो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ ३८ ॥
सुप्तं विरोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ॥ ३९ ॥

अमी च प्रत्येकमेव श्लाध्यन्ते। क्वचिच्छबलतापि। यथा—'क्वाकार्यं शशलक्ष्मणः' इत्यादौ। अत्र 'क्वाकार्यम्' इति वितर्कः। 'भूयोऽपि दृश्येत' इत्यौत्सुक्यम्। 'दोषाणाम्' इति मतिः। 'कोपेऽपि' इति स्मृतिः। 'किं वक्ष्यति' इति शङ्का। 'स्वप्नेऽपि सा दुर्लभा' इति दैन्यम्। 'चेतः स्वास्थ्यमुपैहि' इति धृतिः। 'कः खलु' इत्यादि चिन्ता ॥

इत्यलंकारशेखरे विश्रामरत्न रसमरीचिः ॥ २० ॥

एकविंशो मरीचिः।

'परे रसदोषा भावानुकूलवर्णादयः काव्यशरीरे मनः' इत्युक्तम्। अतो रसदोषानिदानीमाह—

स्वस्वशब्दैरुपादानं भावस्य च रसस्य च।
कष्टप्रकल्पनीयत्वमनुभावविभावयोः ॥ १ ॥

प्रक्रान्तरसवैरित्वं तेषां व्यक्तिविपर्ययः।
अनौचिती च सर्वत्र रसे दोषाः स्युरीदृशाः ॥ २ ॥

सामान्यतो विशेषतो वा स्वस्ववाचकशब्दप्रतिपादितानां निर्वेदादीनां रत्यादीनां वा रसाननुगुणत्वमिति सकलानुभवसिद्धम्। तत्र व्यभिचारिणः स्वशब्दोपादानम् ॥

यथा—

'सव्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्यानवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः ॥'

सव्रीडा प्रतिनयननिपातात्। अत्र व्रीडादीनां स्वस्वभावप्रतिपादितानां चमत्कारजनकत्वस्य सहृदयसाक्षिकतया तदभावादेव रसभङ्ग इत्युचितम्।

एतदेव प्रत्युदाहरणेन प्रतिपादयन्ति—

'व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे
सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि।
मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे
पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः ॥'

स्थायिनो यथा—

'संप्रहारे प्रहरणैः प्रहाराणां परस्परम्।
झणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ॥'

संप्रहारः संग्रामः। अत्रोत्साहस्य। रसस्य रसशब्दप्रतिपादितस्य रसाजनकत्वम् ॥

यथा—

'तामनङ्गजयमङ्गलश्रियं किंचिदुच्चभुजमूलशोभिनीं।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः ॥'

---

१. 'प्रकृते' ग.

शृङ्गारादिपदप्रतिपादितस्य यथा—

'आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैष बाल्यमतिवर्त्य विवर्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति ॥'

अनुभावस्य कष्टप्रकल्पनीयत्वं यथा—

'कर्पूरपूरधवलद्युतिपूरधौत-
दिङ्मण्डले शिशिररोचिषि यस्य यूनः ।
लीलाशिरोंशुकनिवेशविशेषक्लृप्ति-
व्यक्तस्तनोन्नतिरभून्नयनावनौ सा ॥'

अत्र चन्द्रादय उद्दीपनालम्बनविभावाः शृङ्गारयोग्या अनुभावाप्रतीत्या आस्वादनापर्यवसायिनः स्थिताः । यद्यप्यंशुकनिवेशोऽनुभावत्वयोग्यस्तथापि तस्य स्तनव्यक्तिप्रयोजकत्वेनोपादानात्तस्य तदनुभावकत्वपर्यवसानम् । यद्वा पुंसि निष्ठ एवात्र शृङ्गारः प्रतिपिपादयिषितः, 'अभून्नयनावनौ सा' इत्यनेन तस्यैवालम्बनत्वप्रतिपादनात् । न च पुंसि कश्चिदनुभाव उपात्तः, न च विभावैरप्याक्षेपार्ह इति कष्टेन प्रकल्पनीयः ॥

विभावस्य यथा—

'परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशास्यदेहं परिभवति प्रसभं किमत्र कुर्मः ॥'

इत्यनेन प्रकारेणास्य दशा देहं परिभवतीत्यन्वयः । अत्र रतिपरिहारादीनामनुभावानां करुणादावपि संभवेन कामिनीरूपो विभावो यत्नप्रतिपाद्यः प्रकरणादिसव्यपेक्षत्वात् ॥

प्रकृतरसविरोधिविषयको विभावादिः ।

तत्र विभावव्यभिचारिणोरुदाहरणम्—

'प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।

निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥'

अत्र शृङ्गारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावः तत्प्रकाशितो निर्वेदश्च व्यभिचार्ययुक्तः, शान्ते निर्वेदस्य स्थायित्वात् व्यक्तिविपर्यय इति । यद्व्यक्तौ यद्वर्णनमनुचितं तत्र तद्वर्णनम् । व्यक्तयो दिव्या अदिव्या दिव्यादिव्याश्च तत्र दिव्यत्वममर्त्यैकरूपता । यथा—शिवादिशेषादेः । अदिव्यत्वम् मर्त्यैकरूपता । यथा—मालतीमाधवादेः । दिव्यादिव्यत्वमुभयरूपत्वम् । यथा—श्रीकृष्णादेः । त्रिविधा अप्येते चतुर्धा भवन्ति । वीररौद्रशृङ्गारशान्तरसप्रधानाः । धीरोदात्तधीरोद्धतधीरललितधीरशान्ताः । यथा—रामभार्गवकृष्णजीमूतवाहनाः । एते चोत्तममध्यमाधमभेदाद्बहवो भवन्ति । तत्र स्वःपातालगमनसमुद्राद्युल्लङ्घनपर्वतस्फोटनाद्युत्साहो दिव्येष्वेव वर्णनीयः । अदिव्येषु तु यावदेव लोकप्रसिद्धमुचितं तावदेव वर्णनीयम् ॥

अनौचिती च महारसदोषः । स च

भवानीशंकरादीनां पित्रोर्वा केलिवर्णनम् ।
अत्युक्तिर्वा नभःसाम्यं स्तनादौ स्यादनौचिती ॥

इत्यनेनोक्तास्ति[1] । यद्यपि कुमारसंभवे कालिदासेन वर्णितमस्ति तथाप्यर्वाचीनेन न कर्तव्यम् । न हि गजानामुदर्यं तेजो वटकाष्ठमशितं पचतीत्यसदादीनामुदर्येण तेजसा तथा भवितव्यमिति न्यायात् । तस्यापि[2] दोषत्वाद्वा दोषान्तरवदिति[3] ॥

दोषं[4] व्यक्तिविवेकेषु[5] कविलोकविलोचने ।
काव्यमीमांसिषु[6] प्राप्तं महिमा[7] महिमादृतः ॥ ३ ॥

---

१. 'इत्यनेनास्ति वर्णनम्' ग. २. 'तस्यापि दोषानाह—' ख. 'तस्यापि दोषत्वाः दोषान्वक्तुं वदन्ति' ग. ३. 'दोषवदिति' क. ४. 'तेषां व्यक्ति' ख. 'दोषो' ग ५. 'के खं' क. ६. 'मीमांसकप्राप्तमहिमा' ग. ७. 'महिमाह महाकविः' ख.

यदाह महिमा—

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यमूला[1] हि रसस्योपनिषत्परा ॥

ईदृशा इत्यनेनान्येऽप्यनौचित्यहेतवो दोषा भवन्तीति सूचितम् । यथा—नायिकाया मानादिना चरणप्रहारादिना वा नायकस्यात्यन्तिककोपवर्णनम् । व्यक्तिविपर्ययानौचित्ययोरवान्तरभेदविवक्षयेदं भेदकथनम् । अमीषां च क्वचिददोषतापि । यत्र न रसहानिर्भवति तत्र सहृदयैरेव पर्यालोचनीयमिति ग्रन्थगौरवभयान्नेह तन्यत इति ॥

इत्यलंकारशेखरे विश्रामरत्ने रसदोषमरीचिः ॥ २१ ॥

द्वाविंशो मरीचिः ।

इदानीमनुकूलान्वर्णानाह—

उद्दामा वीररौद्रादौ छन्दोरीत्यक्षरादयः ।
हृद्याः शृङ्गारहास्यादौ परयोर्मध्यमा गतिः ॥ १ ॥

रौद्रादावित्यादिपदेन भयानकस्य । हास्यादाविति करुणस्य परिग्रहः । परयोर्बीभत्साद्भुतयोः । शान्तस्य नियमो नास्तीति हृदयम् । उद्दामं छन्दः दण्डकस्रग्धरादि । रीतिर्गौडी । अक्षरेषु **श्रीपादः**—

उद्दामाः सन्तरालेन सजातीयेनरेण[2] च ।
योगाष्टाद्याश्च[3] चत्वारः शषौ[4] विकटगुम्फना ॥

हृद्ये उपेन्द्रादिच्छन्दः । रीतिर्वैदर्भी । अक्षरेषु पुनः स एव ।

रणौ[5] च लघ्वन्तरितौ नश्चोपर्यनुनासिकः[6] ।
असमासोऽथ सोऽल्पो वा हृद्यं स्यात्संधिसौष्ठवम् ॥

यथा—

‘अनङ्गरङ्गप्रतिवं यदङ्गं[7] भङ्गीभिरङ्गीकृतमानताङ्ग्या ।
कुर्वन्ति यूनां हृदयं यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥’

---

१. ‘प्रसिद्ध्यौ’ ग. २. ‘सजातीयेतरेण’ ग; ‘सजातीयरणेन च’ ख घ. ३. ‘यो-द्याश्चैव’ ग. ४. ‘चाष्टौ’ ख; ‘शेषा’ ग. ५. ‘हसौ’ ख; ‘नसौ’ ग; ‘हशौ’ घ. ६. ‘ण’ क; ‘नश्च पर्य’ ख. ७. ‘तदङ्गं इति काव्यप्र०. ‘यदङ्गभङ्गी’ ग.

अथ वैपरीत्यं दोषायेति मनसिकृत्य क्वचिददोषतामाह—

वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित्।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥ २ ॥

यथा—

'मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः[1] कुरुशतनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो[2] दुन्दुभिस्ताडितोऽयम् ॥'

अत्र हि न वाच्यमुद्दामं प्रश्नत्वात्। प्रबन्धश्चाभिनेयत्वान्न तथा। किं तु वक्ता भीमसेन इति तदौचित्यादुद्दामा रचनादयः ॥ क्वचिद्वाच्यौचित्या।

यथा—

'शङ्कुव्याकीर्णरङ्कुद्रुतनिशितशरक्षुण्णदीव्यत्तरक्षु
ज्याघोषक्षुब्धकण्ठीरववरचकितव्यस्तमातङ्गयूथम्।
खड्गव्यालूनखड्गं तुमुलकलकलं प्रान्तकूजच्छकुन्तं
भल्लाध्वस्ताच्छभल्लं वनभुवि मृगयाकर्म तेन प्रतेने ॥'

अत्र हि वाच्यस्य सर्वप्राणिविप्लवात्मकमृगयाया एव तथात्वात्तथा। क्वचित्प्रबन्धौचित्यस्य यथा— कादम्बर्यादौ शृङ्गारेऽपि न मसृणवर्णा इति दिक्।

सर्वसाधारणं दोषमाह—

गृहीतमुक्तको नेष्टो हरचानां विशेषतः[3]।
मात्राभेदोऽप्यतः श्लाघ्यः पदे[4] लेप शुभावहः ॥ ३ ॥

एकस्य पदस्य शेषे यो वर्णः सोऽपरस्याद्ये न दीयते। यथा—नाककला। हकाररेफचकाराणां तु सुतराम्।

---

१. 'क्रोधाग्निदूतः' क. २. 'मुखो' ग. ३. 'न शेषता' ग. ४, 'पदोऽप्येष' ग; 'पदे चैव' घ.

यथा—

'प्रवाहहरिता दूर्वा विहाररसितं तथा।
[1]स्फुरत्काचचया भूमिर्भूयः पुण्यैरवाप्यते॥'

मात्राभेदे तु स्वल्पो दोषः। यथा—नाककादम्बिनी। पदे त्वेष न दोषः, किंतु गुणः। यथा—'वन्दामहे महेशानम्' इत्यादौ॥

अन्यदप्याह—

रणयोश्च चवर्णस्य शैथिल्यायैव भूरिता।

रेफणकारचकाराणां भूयस्त्वं शैथिल्यहेतुतया रसहानिकरमित्यर्थः।

संधौ वर्णदोषमाह—

[2]शरहास्तादतिहृद्ये नमशरहाः काट्टकाराच्च।
चछतथशरा नकारादधरा दोषाय भूयसां योगः॥ ४॥

तात्तकारात्। कात्ककारात्। टाट्टकारात। अधरा अधोवर्तिनः। अतिहृद्ययोः शृङ्गारहास्ययो रसयोर्दोषाय भवन्ति। शब्ददोषकष्टस्यान्वयबोधविरोधिता, अस्य तु तस्मिन्नपि रसहानिरिति विशेषः। अनैकान्तिकबाधयोरिवानुमितौ। एतद्भिन्ने तु तदिति रहस्यम्। भूयसां वर्णानां योगः कात्स्न्र्यादिपदे॥

श्रुतमेवान्यथाकारमक्षराणि कियन्त्यपि।
काव्यालंकारविद्यायां शौद्धोदनिरसूत्रयत्॥
उपक्रमो दोषगुणावलंकारोऽथ वर्णकः।
संप्रदायः कवेस्तस्य सामर्थ्यमथ विश्रमः॥
अष्टौ रत्नानि दीप्तानि सन्त्यलंकारशेखरे।
चत्वारः स्युरलंकारे संप्रदाये मरीचयः।
सामर्थ्ये द्वौ परस्मिंस्तु पञ्चके स्युस्त्रयस्त्रयः॥
मामकीनां कृतिमिमां द्विषन्तो दूषयन्ति ये।
काव्यवार्तां न जानन्ति ते नूनं पांसुलाः सुताः॥

---

१. 'स्फूर्जत्काच' ग. २. 'रसहा' ग.

आस्ते यद्यपि पूर्वपण्डितकृतव्याख्यैव संख्यावता-
मानन्दाय तथापि **केशवकवे**र्वाचामियं गुम्फना ।
संख्यासौष्ठवशब्दलाघवमिथःसंबन्धपूर्वापर-
प्रत्यार्थिप्रतिबन्धनिर्मलगुणः कुत्रान्यतो लभ्यताम् ॥
तर्कप्रौढमतिः प्रशस्तकवितावल्लीवसन्तोत्सवः
कोषव्याकरणप्रपञ्चचतुरोऽलंकारपारंगमः ।
श्रीमत्**केशवमिश्र**मद्भुतगुणावासं नियुज्य स्वयं
चक्रे शक्रसमः प्रबन्धमनघं **माणिक्यचन्द्रो** नृपः ॥

इति श्रीमन्महाराजश्री**माणिक्यचन्द्र**कारिते **केशवमिश्र**कृतेऽलंकारशेखरे
विश्रामरत्नमष्टमम् ॥

समाप्तश्चायं ग्रन्थः ।

KSUL
001791
KSUL

D